Bhusundi ramayan antargat Ram Gita

Dialogue between Shri Ram and Rishi Durvasa

नवमोऽध्यायः

आत्रेय उवाच

यदिदं ज्ञानमाख्यात भवता रघुपुङ्गव।
उपयोगी न बालानां क्षुद्राणामल्पचेतसाम् ॥ १ ॥

---

१. नास्ति बड़ौ०।

ये क्षुद्रा निस्तितीर्षन्ति भवसागरजं भयम्।
तेषां करुणया राम वद गुह्यतरं वचः ॥ २ ॥

श्रीराम उवाच

बालाः सुमन्दमतयो भवाब्धि निस्तितीर्षवः।
सगुणं समुपासीरन् ज्ञानं ज्ञेयं च यत्पदम् ॥ ३ ॥

गुरोरधीत्य छन्दासि सरहस्यानि सर्वतः।
अनुत्कटे तु वैराग्ये गृहमेधीयमाचरेत् ॥ ४ ॥

अग्निहोत्रमुपासीत विधिवत्पूतमानसः।
दर्शं च पौर्णमासं च पशुबन्धक्रतुं तथा ॥ ५ ॥

चातुर्मास्यानि सत्कृत्य पिबेत् सोमं महामखे।
रामार्पणधिया सर्वं कर्म कुर्यादितन्द्रितः ॥ ६ ॥

फलभोगेच्छुना कर्म कृतं फल समर्पकम्।
तत्फल नश्वरं विन्द्यादैहिकामुत्रिकं तथा ॥ ७ ॥

फलं हि परमानन्द ऐहिकः पारलौकिकः।
पूर्णानन्दसमुद्रस्य मम मात्रास्तु ताः किलः ॥ ८ ॥

न मां लोकाः कामयन्ते पूर्णानन्दपयोनिधिम्।
मम मात्राः कामयानाः क्षुद्रास्ते क्षुद्रचेतसः ॥ ९ ॥

मां प्राप्य नान्यकामेषु सज्जन्ते भूरिबुद्धयः।
उदाराः सर्वतः कामा निष्कामा भवसागरे ॥ १० ॥

मोक्षकामाः कृतधियो गुरूपास्तिफलोत्सुकाः।
छर्दितान्नसमं सर्वं पश्यन्तो ब्रह्ममप्युत ॥ ११ ॥

कष्टं कर्मापि कुर्वन्तो विनाशायाल्पमेधसः।
विना मदर्पणधियं कर्मदोषापहारिणीम् ॥ १२ ॥

प्रयाजाद्यखिलाङ्गानि साधनानि च सर्वशः।
स्रुगादीनि समेतानि दध्याज्यादीनि वै तथा ॥ १३ ॥

मद्रूपाणि समस्तानि भावयेत् सुविचक्षणः।
तथा यज्ञं मत्स्वरूपं भावयेत् कर्मदीक्षितः ॥ १४ ॥

नित्यं नैमित्तिकं काम्यमेवं कुर्यादितन्द्रितः।
कर्मरूपस्य च मम पदाभिव्यक्तिरुद्भवेत् ॥ १५ ॥

[१]परापरविभेदेन सुखं तद्द्विविधं मतम्।
तदा कर्तुर्ज्ञानवतो मुक्तिः सा क्रमतो भवेत् ॥ १६ ॥

---

१. सुखं तद् द्विविधं प्रोक्त परापर विभेदतः—बड़ौ०।

ज्ञानाभावे स्वर्गसुखं लभते मूढमानसः।
परं नियतलोकाख्यं वाक्यशेषेण गद्यते॥ १७॥

श्रद्धा चैव तथासूया दुःखानि विविधानि च।
स्वर्गिणामपि जायन्ते तथान्यैश्च पराभवः॥ १८॥

प्रवृत्तिमार्गनिष्ठा हि ध्रुवाधस्तात् स्थिता अमी।
न ध्रुवोपरि वै तेषां स्वर्गिणां गतिरिष्यते॥ १९॥

न च स्वर्गेषु लोकेषु वाक्यशेषोदितं सुखम्।
नित्यमात्मसुखं तद्धि सत्त्ववृद्ध्या प्रजायते॥ २०॥

शुद्धे सत्वगुणे चैव स्वर्गः सत्त्वभवो भवेत्।
कामाभावेऽपि तन्मुख्य फलमुक्त न संशयः॥ २१॥

सार्वकामिकमेतद्धि फलं वेदे निगद्यते।
यागस्य मत्स्वरूपत्वान्मुक्तिरेव फलं भवेत्॥ २२॥

परोक्षकथनद्वारा तदेवाह गिरां पतिः।
अलसा अनुशास्यन्ते प्ररोचनगिरा मुहुः॥ २३॥

यजेत पशुबन्धेन स्वर्गलोकफलाप्तये।
अक्षय्यं सुकृतं लब्धुं चातुर्मास्यैर्यजेन्नरः॥ २४॥

आत्मानन्दस्वरूपं तदक्षयं समुदीर्यते।
तदेव सर्वलोकाख्यं वेदेषु च निगद्यते॥ २५॥

सर्वे लोकाः स्वयं ह्यात्मा सच्चिदानन्दलक्षणः।
आदित्यानां च विश्वेषां वसूनां वरुणस्य च॥ २६॥

अग्नीनां तु चितानां च भास्वराणां दिवौकसाम्।
मरुतां चैव साध्यानां रुद्राणां गणपां तथा॥ २७॥

कुबेरस्य ब्रह्मणश्च तथैवानन्तसंज्ञिनः।
सर्पाणां देवजनानां देवानां च विशेषतः॥ २८॥

देवानां कर्मदेवानां ये ये लोकाः सनातनाः।
सच्चिदानन्दरूपाश्च तत्तद्भोगभयास्तथा।
सर्वेपरिसमाप्यन्त आत्मन्येव न संशयः॥ २९॥

आत्मा स्वयंज्योतिरजः सनातनः सच्चित्सदानन्दमयः स्वयं प्रभुः।
अनन्यतन्त्रः कुशलैकभाजनं स्वभासकः सन् परभासकश्च सः॥ ३०।

स्वर्ग एव फलं नित्य नान्यत्क्वापि श्रुतेर्मतम्।
पश्वादिकं तु विकृतौ फलमुक्तं मदात्मकम्॥ ३१॥

मदात्मकं तद्धि तथा मद्रूपं नियतं श्रुतौ।
नित्यकर्माणि पोष्यन्ते काम्यकर्माद्युदीरणात्॥ ३२॥

अभावे पशुपुत्रादिबहुवित्तस्य ससृतौ ।
नित्यकर्म कथं सिद्धेद्बहुवित्तव्ययोजितम् ॥ ३३ ॥

सर्वोपायगिरा वेदो नित्यमेव प्रसाध्यते ।
नित्यं कर्म सदा कार्यमनित्यं न कथंचन ।
एतद्धि नियतं लोके मत्स्वरूपं विभावयेत् ॥ ३४ ॥

ध्यानेन धारणाभिश्च समाधिभिरथापि च ।
परमात्मा यथा नृणामभिव्यक्तो भवेद्ध्रुवम् ॥ ३५ ॥

एवमाधानप्रमुखैः कर्मभिर्वेदबोधितैः ।
यज्ञरूपश्च भगवान् अभिव्यक्तो भवेद्ध्रुवम् ॥[1]
अहं यज्ञस्वरूपात्मा यज्ञकर्ताहमच्युतः ।
यज्ञभोक्ता यज्ञकर्ता यज्ञसाधनमप्यहम् ॥ ३६ ॥

अहं यज्ञे सम्प्रदानमपादानमहं मुने ।
अहं च यज्ञशेषोऽपि शेषी यज्ञोऽहमुत्तमः ॥ ३७ ॥

यज्ञाधारोऽहमतुलो यज्ञो वै मामकी तनुः ।
इति ज्ञात्वा यज्ञपरो भवेदस्मिन् बुधोऽपसन् ॥ ३८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

श्रीराम उवाच

पुरुषार्थपरो नित्यं तत्त्वज्ञः पुरुषो भवेत् ।
व्यासतस्ते तु चत्वारो द्वावेव तु समासतः ॥ १ ॥

धर्मार्थकाममोक्षाख्याः क्रमशः परिकीर्तिताः ।
द्वौ च वेदे निगद्येते दुःखाभावसुखात्मकौ ॥ २ ॥

दुःखाभावस्तु मोक्षः स्यात्परः कामोऽपि सम्भवेत् ।
तयोरङ्गं भवेद्धर्मः स च भूयोऽर्थसाधितः ॥ ३ ॥
अहमेव फलं वेदे तस्य साधनमप्यहम् ।
नामरूपप्रपञ्चात्मा नित्य एवाहमच्युतः ॥ ४ ॥

१. भ्रमाद्विलिखितं–बड़ौ० ।

रूपप्रपञ्चाशक्तानां कर्तुर्नामप्रपञ्चके ।
अहं चक्रे श्रुतिं दिव्यां भूतभव्यानि यत्र वै ॥ ५ ॥

आत्मप्रसादकरणीं जगौ तां भगवान् विधिः ।
स च दिव्यःश्रुतेरर्थः सात्त्विकानां हृदि स्फुरन् ॥ ६ ॥

समन्वयेनाविरोधाद्वेदार्थं च समर्थयेत् ।
त्रिविधोजीवसंघातो देवदानवमानवाः ॥ ७ ॥

सर्वेऽपि ते वेदविदो ब्राह्मणा वेदपारगाः ।
स्वभावगुणभेदेन वेदार्थस्यैव वर्णकाः ॥ ८ ॥

बुद्धिवैचित्र्यतस्तेषां वेदार्थो बहुधास्फुटः ।
केचिद्वेदविदो विप्राः स्वीचक्रुः कर्म मात्रकम् ॥ ९ ॥

कर्मैव सारोवेदानां न ज्ञानं नापि वेश्वरः ।
ज्ञानमेवाहुरपरे भक्तिमेव तु मामकाः ॥ १० ॥

कर्मापि मत्प्रभावेणसूते फलमुदारवत् ।
ज्ञानं चापि मदाधारस्वरूपं बोधयत्यहो ॥ ११ ॥

तस्मान्मत्सेवका लोका भक्तिं कुर्युर्मदात्मिकाम् ।
अपुनर्जन्मनिष्कामां निषेधः कर्मणि श्रुतः ॥ १२ ॥

अन्यथा पुनरुत्पत्तिक्षयिष्णुकर्मणां भवेत् ।
भवेषु वै नोत्पद्यन्ते प्रपाता अर्चिरादिना ॥ १३ ॥

धूमादिना प्रयातानां नियतः पुनरुद्भवः ।
एकमेव भवेत् कर्म प्रकाशस्तस्य भूरिशः ॥ १४ ॥

एक एव च वेदोऽपि नित्या सामतनुर्यतः ।
लौकिकानामात्मधियां जनानां भवजन्मिनाम् ॥ १५ ॥

न पाठशक्तिर्नैवापि ज्ञानशक्तिरनन्तदृक् ।
ततो मदात्मको व्यासश्चातुर्होत्रविभागतः ॥ १६ ॥

व्यस्तवान् सकल वेदं ततस्तत्प्रेरितैर्मुने ।
तच्छिष्यैर्भेदिताः शाखाः कृत्स्नं तन्त्र वदन्ति ताः ॥ १७ ॥

कर्मणां जैमिनिस्तत्त्वं जानाति स महामुनिः ।
सर्वज्ञो भगवान् व्यासो ज्ञाननिर्णयमुक्तवान् ॥ १८ ॥

मुनिर्द्वयनिबन्धार्थैः सर्ववेदार्थनिर्णयः ।
बहुभिर्ऋषिभिर्वादैः कृत्स्नं तन्त्रं प्रकोपितम् ॥ १९ ॥

वेदराशिमुपासीत पुरुषं तन्मनीषया ।
करौ पादौ शिरो वक्ष एव वै पुरुषो मतः ॥ २० ॥

शिरस्तत्परमं ब्रह्म यदौपनिषदं ह्यदः ।
पञ्चसंस्थात्मको यज्ञोऽपराङ्गानि निबोधय ॥ २१ ॥

वेदस्यानुगतो ह्यर्थः स्मृतिरित्युच्यते मुने ।
पूर्वानुभूतवस्तूनां स्मरणं चोच्यते स्मृतिः ॥ २२ ॥

पारम्पर्याचारतः सालोकतापि मता क्वचित् ।
क्वचिन्न्यात्क्वचिन्नित्यानुमेयश्रुतिमूलतः ॥ २३ ॥

श्रुतिस्मृती उभे एव धर्मस्य परिपोषिके ।
जातानां जन्मना पूर्वं गर्भाधानादिकाः क्रियाः ॥ २४ ॥

तथैव सन्ध्योपास्यापि नित्यश्राद्धादिकाः क्रियाः ।
पाकयज्ञादिकं चापि प्रायश्चित्तं तथैव च ॥ २५ ॥

इत्येष पञ्चधा धर्मः संगृहीतः पुरातनैः ।
अयं नित्य इति प्रोक्तः परमो वेदमूलकः ॥ २६ ॥

व्रतं तीर्थं तथा सर्वं नित्यकार्यमिति स्मृतम् ।
पारम्पर्यवशात्प्राप्तं सद्भिरेव समादृतम् ॥ २७ ॥

पुराणमूलकं चापि तदनुष्ठेयमुच्चकैः ।
शुद्धिरेव तु संस्कारः कर्म त्रैवर्णिकस्य यत् ॥ २८ ॥

स चापि बहुधा प्रोक्तो देशकालादिभेदतः ।
दैशिकः कालिकश्चापि तथा च द्रव्यकृन्मतः ॥ २९ ॥

कर्त्तृतो मन्त्रतश्चापि कर्मतश्चापि कीर्तितः ।
षोढा संस्कारमित्याहुः कर्माङ्गं तन्निगद्यते ॥ ३० ॥

वेदतुल्यं पुराणं च प्रमाणत्वे स्मृतं बुधैः ।
पुराणाना विभागश्च वेदशाखाविभागवत् ॥ ३१ ॥

सात्त्विकादिविभेदेन पुराणमपि भिद्यते ।
योगसाख्ये अपि तथा मद्रूपे सत्त्वसाधिके ॥ ३२ ॥

तत्सत्त्व सनकादीनां नित्यमेव निगद्यते ।
तद्वेदोपनिषद्भागफलभूतमुदाहृतम् ॥ ३३ ॥

सत्त्वतः सम्भवेज्ज्ञानं यत्तदात्मनिदर्शकम् ।
उभयोश्चफलं भक्तिर्भावरूपा महोदया ॥ ३४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधित श्रीरामगीतायां दशमोऽध्यायः ॥ १० ॥

*

एकादशोऽध्यायः

आत्रेय उवाच

अथो रघुकुलोत्तंस ब्रूहि भक्ति निजां पराम् ।
ययानुष्ठितया लोकस्त्वत्सम्बन्धमवाप्नुयात् ॥ १ ॥

श्रीराम उवाच

आत्रेय शृणु वक्ष्यामि मम भक्ति मदात्मिकाम् ।
कर्मभिः शुद्धचित्तत्वादात्मज्ञो जायते नरः ॥ २ ॥

आत्मज्ञे स परो भावः समुदेति मदात्मकः ।
मन्निष्ठेऽभ्युदिते भावे नान्यत्प्राप्तव्यमिष्यते ॥ ३ ॥

सोत्कण्ठो जायते नित्यं मत्पुण्यचरितश्रुतौ ।
मन्नामस्मरणोद्भूतपरमानन्दनिर्भरः ॥ ४ ॥

मदाधारपरो भूत्वा नान्यत्स्पृहयति क्वचित् ।
मृत्योर्मूर्द्ध्नि पदं दत्वा विहरेत समंततः ॥ ५ ॥

ऐहिकामुष्मिके लोके विरक्तो मत्पदाश्रयः ।
नित्यं मम वने तिष्ठेत् प्रमोदवनसंज्ञिनि ॥ ६ ॥

ततो मां पश्यते तत्र निर्भरप्रेमसम्प्लुतः ।
खेलन्तं सहजानन्दासंगसंगतमङ्गलम् ॥ ७ ॥

विचित्रवंशीरवगायनोद्धुरं विचित्रवेषं मणिरत्नमण्डितम् ।
मृदुस्मृतापूरितचन्द्रमण्डलप्रभामुखं मोदवतीविहारिणम् ॥ ८ ॥
विचित्ररत्नाद्रिदरीस्थधातुभिर्विचित्रितोरस्कमनन्यसुन्दरम् ।
मुक्तावतंसप्रविभूषितस्फुरत्तुङ्गोत्तमाङ्गं स्मर मा रामचन्द्रम् ॥ ९ ॥
ततो मामीदृशं पश्यन् बद्धप्रेमा भवेन्मयि ।
प्रेमाणमाशु लभते मत्प्रसादादनन्यधीः ॥ १० ॥

न हिमत्प्रेमणि प्राप्ते प्राप्तव्यान्तरमस्ति च ।
ईदृशा रसिका भक्ता वैष्णवाः प्रेमभागिनः ॥ ११ ॥
अति दुर्लभसम्बन्धाः कथं लभ्याः शुभं विना ।
तेषां चरणपाथोजनिषेवणकृतां सताम् ॥ १२ ॥

सुलभोभगवत्प्रेमा क्षेमाकर उदग्रभाः ।
तेषां वाक्यागमेनैव शुद्धता मनसो भवेत् ॥ १३ ॥

[1]तत्कर्पालेशमात्रेण निस्तरेद्भवसागरम् ।
तदुच्छिष्टान्नभोज्येन सर्वज्ञत्वमवाप्नुयात् ।
तेषां स्वरूपं त्रिदशैरज्ञेयं विष्णुवेदिभिः ॥ १४ ॥

---

१ तत्कृपालेशमात्रेण—बडौ० ।

ते दृश्यमाना अपि चक्षुषा मुने साक्षात्स्वयं मत्तनवः प्रकीर्तिताः ।
वशीकृतो यैरहमप्रमेयः परापरज्ञः परमप्रेमभाग्भिः ॥ १५ ।

ते मद्भक्ता मत्स्वरूपज्ञातारो मम केलिषु ।
दत्तप्रज्ञाः दत्तगिरो दत्तश्रवस उद्भटाः ॥ १६ ॥

सर्वेषु व्यवहारेषु मामेवाखिलरूपिणम् ।
नित्यं व्यवहरन्तस्ते ब्रह्मज्ञा इति कीर्तिताः ॥ १७ ॥

नान्ये मनुष्या ब्रह्मज्ञा भवन्तीह कदाचन ।
मन्नामरूपलीलानां ऋते ज्ञानादनुत्तमात् ॥ १८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायामेकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

आत्रेय उवाच

त्वय्यर्पितमनोबुद्धिरैहिकामुष्मिकादिभिः ।
स्वरूपज्ञैर्ब्रह्मविद्भिः कथं स्थेयं वदस्व तत् ॥ १ ॥

किं कर्त्तव्यं किमध्येयं सगुणं निर्गुणं च वा ।
किं वक्तव्यं किमुन्नेयं किं प्राप्यं राम सत्पते ॥ २ ॥

तदेतत् कृपया नाथ ममाख्याहि सतां गते ॥ ३ ॥

श्रीराम उवाच

आत्रेय शृणु वक्ष्यामि भक्तानां प्रीतिभागिनाम् ।
मय्यर्पिताखिलानां च या चर्या तां विशेषतः ॥ ४ ॥

संक्षेपतस्ते पूर्वोक्तामनुभावस्वरूपिणीम् ।
भक्तिर्नाम परो भावश्चर्या तस्याणुभावका ॥ ५ ॥

सा तेषां स्थितिरत्युग्रा ह्यसिधारापथानुगा ।
स्ववर्ग्यान्नं तु भुञ्जीत समर्प्य श्रीराममपि ॥ ६ ॥

समर्पणं त्रिविधं प्राहुर्मम मूर्तौ समक्षकम् ।
परोक्षं मानसं प्रोक्तं तृतीयं वैष्णवाग्रतः ॥ ७ ॥

भुञ्जीत तस्यावशिष्टं प्राणस्य स्थापनं मितम् ।
नामानि च गृणीतैवं प्रेम्णा मम दिवानिशम् ॥ ८ ॥

नृत्यगायनवादित्रैस्तोषयेन्मां विशेषतः ।
मत्प्रसादोपलब्धं च धारयेदम्बरादिकम् ॥ ९ ॥

तुलसीदलमालां च धारयेत्कण्ठदेशतः ।
काले शुष्कतमां शाखां तुलस्यासितमेचकाम् ॥ १० ॥

गृहीत्वा मणिसंदोहं सच्छिद्रं रचयेन्नरः ।
तैर्निर्मितां महामालां धारयेदुपवीतवत् ॥ ११ ॥

शिखायां वैष्णवो भाले कण्ठे बाह्वोश्च हस्तयोः ।
सर्वतो धारयेन्मालास्तुलसीकाष्ठसम्भवाः ॥ १२ ॥

धनुर्बाणं परं श्रेष्ठं मन्नामानिच धारयेत् ।
चक्रात् कोटिगुणं प्रोक्तं मन्नामानि च वै क्रमात् ॥ १३ ॥

धनुर्बाणौ परात्परौ मन्नामानि च वा पुनः ।
आयुधैः सकलैर्बाह्वोर्मन्नाम परिवेष्टयेत् ॥ १४ ॥

बाणं च वेष्टयेत् सर्वैरायुधैवक्षसः स्थले ।
भालेन धारयेन्नाम मन्नामानि च भूरिशः ॥ १५ ॥

सर्वत्र धारयेद्बाणं शरीरे तत्परात्परम् ।
काश्मीरेण समायुक्तं श्वेतचन्दनमुत्तमम् ॥ १६ ॥

यावकेन समायुक्तं पुण्ड्रयेदूर्ध्वतः सुधीः ।
त्रिपुण्ड्रं नैव कुर्वीत विशेषेण विवर्जयेत् ॥ १७ ॥

अङ्गवस्त्रमपिस्नाने न तिर्यग्धारयेद्बुधः ।
यत्प्रमोदवने रम्ये रत्नाद्रितट भूमिषु ॥ १८ ॥

पीतपाण्डुरकं रम्यं रजस्तद्धारयेत्तनौ ।
वशीकुर्यात्स मां भक्त्या यो वहेतद्वनं रजः ॥ १९ ॥

पवित्रं सहजानन्दाश्रीचारुचरणाङ्कितम् ।
सहजप्रेमदं सर्वकामदं शशिमङ्गलम् ।
ममापि सा प्रियाधूलिस्तद्बिन्दुं मूर्द्ध्नि धारयेत् ॥ २० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां भक्तचर्याकथनं नाम द्वादशोऽध्यायः ॥१२॥

✲

त्रयोदशोऽध्यायः

श्रीराम उवाच

नोष्णीषं धारयेद्भक्तः पुरुषाहंकृति तथा ।
श्मश्रूणि कंचुके चैव[1] पूर्वनाम च यद्भवेत् ॥ १ ॥

वर्णाश्रमादिचिह्नानि सोपवीतां शिखां पुनः ।
ऋगादिसर्वभागांश्च सर्ववेदायतोऽस्य हि ॥ २ ॥

सर्ववेदसमं तद्धि यत्प्राप्तं मामकं पदम् ।
स्मार्तानि च निषिद्धानि स्वविरोधेन पालयेत् ॥ ३ ॥

दहेच्च भुजयोर्युग्मं मामकैर्धनुवीरुधैः ।
कुर्याच्च सर्वगात्रेषु संस्कारं पुण्ड्रकाभिधम् ॥ ४ ॥

पवित्रं धारयेन्नाम रामदासादिरूपभाक् ।
तदुच्चारणमात्रेण पूतो भवति मानवः ॥ ५ ॥

यथा रामभगवतो नामोच्चारणतो मम ।
तथा पावयति ब्रह्मन् नाम सम्बन्धिनोऽपि मे ॥ ६ ॥

तादृशानि तु नामानि यान्ति लौकिकतां न च ।
तन्नामयोगमात्रेण मदीयो जायते नरः ॥ ७ ॥

यदात्मा मत्पदं प्राप्तः साक्षान्मद्दासतां गतः ।
तादृशं यस्य नामास्ति न तस्य गृहकल्पनम् ॥ ८ ॥

रामो देवः सदा येषां राम एव च तारकः ।
राम एव तथा कर्त्ता वैष्णवान् पूजयेत् सदा ॥ ९ ॥

तन्नामवति वै भक्ते न भवेद्यमयातना ।
तस्माल्लौकिकनामानि परित्यज्य सदा नरः ॥ १० ॥

तादृशं धारयेन्नाम यादृशं वैष्णवोचितम् ।
ततः स रामदासाख्यः श्रीगुरुं सततं भजेत् ॥ ११ ॥

स तं करुणया ब्रह्मन् दिव्यमन्त्रमुपादिशेत् ।
मन्त्रश्च द्विविधः प्रोक्तो द्वयश्चाद्वय एव च ॥ १२ ॥

देशिकोक्तप्रकारेण तं मन्त्रं प्रजपेन्नरः ।
मन्त्रजापीभवेत्पूतो मन्त्रजापीभवेन्मुनिः ॥ १३ ॥

मन्त्रजापी भवेद्दिव्यस्तस्मान्मन्त्र सदा जपेत् ।
बीजमन्त्रं जपेद्वापि नाममन्त्रं जपेन्मुने ॥ १४ ॥

---

१. जन्मनाम–टि० बडौ० ।

बीजमन्त्रं चिरात्सिध्येन्नाममन्त्रं तु तत्क्षणात् ।
रामरामादिकं नाम बीजं मायारसादिकम् ।। १५ ।।

बीजचैतन्यसाक्षात्त्वे बीजं सिध्यति तत्क्षणात् ।
तत्तु दूरतरं लोकं भावनावसचेतसाम् ।। १६ ।।

कोटिबालार्कसंकाशं कोटिचन्द्रसमप्रभम् ।
कोटिविद्युत्प्रतीकाशं चमत्कारकलानिधिम् ।। १७ ।।

भावयेन्मन्त्रचैतन्यं स्वात्माभेदेन साधकः ।
तत्प्रभापुञ्जसंजातहस्तपादादिविग्रहम् ।। १८ ।।

भावयेन्मन्त्रदेवं च रामचन्द्रं परात्परम् ।
या यस्य भावनासक्तिः सा मूर्तिस्तस्य विस्फुरेत् ।। १९ ।।

साक्षात्कृतो देवदेवो दत्ते कामपरं पुरः ।
आचारपूततां ब्रह्मा विष्णुः श्रियमनश्वराम् ।। २० ।।

ऐश्वर्यं भगवानीशो बलं तु मघवा हरिः ।
सूर्यस्तेजः शशी चायुरग्निरोजः प्रयच्छति ।। २१ ।।

सरस्वती सरस्वतीमुमादेवी पराक्रमम् ।
कुबेरश्च धनं भूरि वायुर्दत्ते बलोद्भवम् ।। २२ ।।

वरुणः शान्तिमतुलां यमो धर्मबलोदयम् ।
निर्ऋतिः कुरुते वृद्धिमन्ये देवास्तथा वरान् ।। २३ ।।

अहं पुनरभीतिं च प्रपन्नेभ्यो ददामि वै ।
एवं मन्त्रं समाराध्य कृतकृत्यो भवेन्नरः ।। २४ ।।

नहि मन्त्रेण सदृशं शीघ्रोपायेषु विद्यते ।
नामोपात्रस्ततः शीघ्रः प्रवक्ष्यामि च तं मुने ।। २५ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां त्रयोदशोऽध्यायः ।। १३ ।।

चतुर्दशोऽध्यायः

श्रीराम उवाच

नामैव मम जीवातुर्भक्तानां दृढचेतसाम् ।
नामैव तारकं ब्रह्म भवाब्धेरतिदुस्तरात् ।। १ ।।

नामश्रीनामसयुक्तं मम वित्तैकपारकम् ।
तारकं पारकं ब्रह्म यो जानाति स पण्डितः ।। २ ।।

स एव वैष्णवो भक्तः प्रेमसत्कृतमानसः ।
स एव सर्वदर्शी च स एव मम बल्लभः ।। ३ ।।

नामामृतमुदारं मे मोहध्वान्तविनाशकम् ।
ब्रह्मानन्दाधिकं नाम रामचन्द्रपदात्मकम् ।
प्रेमानन्दमय ज्ञेयं रामेति द्व्यक्षरं पुनः ।। ४ ।।

ग्रह्णन्ति रामेति च नाम नित्यं भक्ता भवाब्धेस्तरणाय तावत् ।
रामेति मे नाम पुनर्गृणन्तः प्रेमामृतं भूरितर पिबन्ति ।। ५ ।।

रामेति रेफोऽनलकीलयोगो मकारचन्द्रः स्रवतेऽमृतानि ।
संस्नाति यस्तत्र नरोऽतिधन्यः स मे प्रियो वैष्णवभक्त राजः ।। ६ ।।

प्रणवादपि मन्नाम मद्रूपत्वप्रदायकम् ।
अधिकं खलु विज्ञेय साक्षान्मद्रूपबोधनात् ।। ७ ।।

अन्तरङ्गात्मिका सृष्टिर्नामिरूपात्मिका मम ।
उभे अपि सदा नित्ये अविनाभाववत्यपि ।। ८ ।।

नामसृष्टिः समस्तापि रामेत्यत्र समाप्यते ।
रूपसृष्टिस्तथा सर्वा श्यामे धाम्नि समाप्यते ।। ९ ।।

मन्नाम द्व्यक्षरं ब्रह्मन् ममापि प्रीतिदायकम् ।
रमेऽहमपि मे धाम्नि श्यामे परमसुन्दरे ।। १० ।।

आकाशमतसीपुष्पं तापिच्छद्रुम कोरकम् ।
ममाङ्गतुलनाप्राप्तं लोके धन्यतमं खलु ।। ११ ।।

मद्धर्मबोधकं नाम यद्राम इति गोपितम् ।
तद् गृणंल्लभते तादृक् स्वरूपं सहजोज्ज्वलम् ।। १२ ।।

मद्रूपमविनाभूतं ध्यायन् मुच्येत पातकात् ।
अमुनाद्व्यक्षरेणैव रामेति रुचिरात्मना ।। १३ ।।

रामेति द्व्यक्षर नाम गोपयेन्निजचेतसि ।
उपांशुना जपेन्नित्यं स्फोरयेन्न गलाध्वना ।। १४ ।।

उच्चैःशब्देनापि नियमेकान्ते राममुच्चरेत् ।
एवं मां नामरूपाभ्यां भावयेत्सुसमाहितः ।। १५ ।।

मन्नित्यलीलासम्बन्धं प्रमोदविपिने लभेत् ।
तस्मान्नामपरो नित्यं भवेदेकान्तवैष्णवः ।। १६ ।।

नामशक्त्याशया जातु न कुर्यात्पातकं जनः ।
नामग्रहणगर्वं च न कुर्याद्भक्तसंसदि ।। १७ ।।

नामोद्धारं न कुर्वीत गृह्णीयात्प्रयतः सदा।
अन्यदेवस्य यन्नाम मन्नाम्ना तुलयेन्न तत् ॥ १८ ॥
स्वरूपे सविधे चापि न कुर्यान्नामभूरिताम्।
न परश्रवणार्थं च नामकीर्त्तनमाचरेत् ॥ १९ ॥
अविश्वासेनापिनामग्रहणं परिवर्जयेत्।
तथान्यदेवतानामजापो नैमित्तिकादिषु ॥ २० ॥
तथा पुत्रादिकं नाम मन्नाममहिमाङ्कितम्।
न कुर्यात् किंतु तदा सनामाङ्कं कुरुते पुनः ॥ २१ ॥
नान्त्यजाया दिशेन्नाम श्रद्धादिरहिताय च।
न द्विजायापि मन्नामविश्वासरहिताय च ॥ २२ ॥
न श्रावयेन्नीचकर्णे न विक्रीणीत लोभतः।
न वृत्त्योयदि शेत्कापि नाचार्यख्यापनाय च ॥ २३ ॥
न जपेदशुचित्वेऽपि न रुद्राक्षादिभिर्जपेत्।
तुलसीकमलाक्षाणां मणिमालिकया जपेत् ॥ २४ ॥
यद्वान्तर्मालिकां धृत्वा जपेन्मन्नाममन्त्रकम्।
जाग्रत्स्वयंस्तथा जिघ्रन् पश्यन् गच्छंल्लपञ्श्वसन् ॥ २५ ॥
भुञ्जानो जृम्भमाणश्च शयानो विसृजत् रुजन्।
क्षुवन्नमान्नुन्नमंश्च तिष्ठन् कुर्वन् स्पृशन्नपि ॥ २६ ॥
सर्वेषु व्यवहारेषु मम नामपरो भवेत्।
वसनं वासनं भूषामुष्णीषं कंचुकं तथा ॥ २७ ॥
उत्तरीयं चाङ्गुलीयं मन्नामाङ्कितमुद्वहेत्।
पत्नीः पुत्रांश्च पुत्रीश्च तथा दासजनं निजम् ॥ २८ ॥
मन्नामाङ्कितदासाख्यान् कुर्यात् प्राकारकादिषु।
नाम गायेन्नाम रटेन्नामैव भृशमाश्रयेत् ॥ २९ ॥
ब्रह्मयज्ञादिकालेषु नामैवाध्ययनं चरेत्।
अनुध्यानं प्रकुर्वीत नामस्वाध्यायमाचरेत् ॥ ३० ॥
पातकं हरते विष्णोर्नाम दैत्यवधाङ्कितम्।
[1]मुक्तिं ददाति गोविन्दो मुकुन्दादिस्वभावतः ॥ ३१ ॥
आयुधैरङ्कितं नाम ददात्यभयमेव च।
आनन्द वर्धयेन्नाम ह्यवतारक्रियाङ्कितम्[1] ॥ ३२ ॥

---

१. १ बड़ौदा।

श्रीनामाङ्कितमन्नाम मत्स्वरूपं ददाति च।
तत्रापि सहजानन्दासम्बद्धं मम नाम यत्।
तत्सुगोप्यतमं साक्षात्प्रेमसायुज्यदायकम् ॥ ३३ ॥

अन्यत्कृष्णमकुन्दादिनाममाहात्म्यं वर्त्तते।
रामनामस्वरूपं तु मयापि किमु वर्ण्यताम् ॥ ३४ ॥

न चत्वारोऽपि वै वेदाः समन्त्राः सप्तकोटयः।
न यज्ञा अश्वमेधाद्यास्तीर्थानां चापि कोटयः ॥ ३५ ॥

न मेरुतुल्यदानानि न योगाश्च तपांसि च।
रामेति नाममात्रस्य तुलां यान्ति महामने ॥ ३६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामनामाख्यगीतायां चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

श्रीराम उवाच

उपचारैर्बहुविधैर्मां यजेत विधानतः।
एककालं द्विकालं वा त्रिकालं वा विशेषतः ॥ १ ॥

प्रातर्गुरुपदं ध्यात्वा ध्यात्वा हृत्कमले च माम्।
देहकृत्यं विनिर्वर्त्य मन्त्रस्नानं समाचरेत् ॥ २ ॥

गृहीत्वा मूलमन्त्रेण मृदमस्त्राभिमन्त्रिताम्।
विशोध्य शिखया गात्रं मूलेनैव विसर्जयेत् ॥ ३ ॥

सम्मुखीकरणं कृत्वा प्राणरोधनपूर्वकम्।
नाभिदघ्ने जले स्थित्वा प्राणायामं विधाय च ॥ ४ ॥

षडङ्गं परिकल्प्याङ्गे चक्राकारं जलं स्मरेत्।
उपकल्प्यजले तीर्थं सूर्याद्यावाहयेत् सुधीः ॥ ५ ॥

अङ्कुशेन च सम्भिद्य एकीकुर्याज्जलेन च।
तत्र मत्पादसलिलं बुद्ध्वामज्जेत् पुनः पुनः ॥ ६ ॥

देवं संतर्प्य निर्मज्ज्य स्कन्धे वक्षसि मूर्द्धनि।
धौताम्बरेपरीधाय संध्यातर्पणमाचरेत् ॥ ७ ॥

गृहीत्वा देवसलिलं यागभूमिमथाविशेत् ।
धौताङ्घ्रिपाणिराचम्य सामान्यार्घं विधाय च ॥ ८ ॥

गन्धपुष्पोदकैः सर्वाः पूजयेद्द्वारदेवताः ।
सिंहासनं समापूज्य पात्राणि स्थापयेत्सुधीः ॥ ९ ॥

पाद्यार्घ्याचमनादीनि नैवेद्यान्तानि च क्रमात् ।
देवमावाह्य विधिवत् पूजयेत् सुसमाहितः ॥ १० ॥

आवाहनं स्थापनं च संनिधापनमेव च ।
संनिरोधनमप्युक्तं सकलीकरणं तथा ॥ ११ ॥

अवगुण्ठनमप्युक्तममृतीकरणं तथा ।
आप्यायनं च परमीकरण जलबिन्दुभिः ॥ १२ ॥

गन्धं पुष्पं तथा धूपं नैवेद्यारार्तिके तथा ।
आचमनं ततो दत्त्वा वैजयन्तीं समर्पयेत् ॥ १३ ॥

तुलस्याः सुदलैर्माला पञ्चवर्णप्रसूनकैः ।
ग्रथिता पादपद्मान्ता वैजयन्ती निगद्यते ॥ १४ ॥

भूषयेच्चैव भूषाभिर्मूर्तिप्रतिकृतौ पुनः ।
शालग्रामशिलाया मे पूजनं नित्यमुत्तमम् ॥ १५ ॥

ततोऽप्युत्तमकं यन्त्रे परिवारगणान्विते ।
यन्त्रादप्युत्तम मूर्तौ स्थापितायां विधानतः ॥ १६ ॥

अचलायां महामूर्त्तौ तत्रा[1]प्युत्तमपक्षता ।
रङ्गनाथे वेकटे च श्रीमद्विठ्ठलवल्लभे ॥ १७ ॥

जगन्नाथे बदर्यां च दिव्यपूजाफलं भवेत् ।
अन्यासु चापि दिव्यासु प्रतिमासु विशेषतः ॥ १८ ॥

काले काले यजेद्भूरिसंविदाभिरुदारधीः ।
वसन्ते पूजयेन्नित्यं पुष्पैर्दमनकोद्भवैः ॥ १९ ॥

रसालपल्लवैर्लग्नमञ्जरीकैः प्रपूजयेत् ।
चम्पकैर्वकुलैश्चापि माधुरीलतिकोद्भवैः ॥ २० ॥

अन्यैश्च विविधैः पुष्पैः कुसुमाकरसम्भवैः ।
अतियुक्तैर्मल्लिपुष्पैर्ह्रस्वशाखासिकोद्भवैः ॥ २१ ॥

ग्रीष्मे चन्दनलेपैश्च तथैव व्यजनानिलैः ।
शीतोदकैश्च नैवेद्यैरेलाकर्पूरगन्धिभिः ॥ २२ ॥

वैशाखस्य सिते पक्षे तृतीया या भवेद्दिवा ।
तस्यां चन्दनयात्रायां चन्दनैर्मां विलेपयेत् ॥ २३ ॥

---

१. नास्ति–बड़ौ० ।

चैत्रे च दोलयेद्धरि दक्षिणाभिमुखं हि माम् ।
तं ये पश्यन्ति मनुजास्तेषां न पुनरूद्भवः ॥ २४ ॥

रसालमञ्जरीपत्रपुष्पाच्छादितदोलके ।
आरूढं मां न पश्यन्ति किं ते धन्या नरा भुवि ॥ २५ ॥

ज्येठाभिषेकं कुर्वीतं ज्येष्ठपूर्णादिने पुनः ।
सुवर्णं धर्ममित्याद्यैर्यजुःपुरुषसूक्तकैः ॥ २६ ॥

ब्राह्मणान् वैष्णवान् भक्तांश्चन्दनादिभिरर्चयेत् ।
ततो रथोत्सवः कार्यो रथारूढे हरौमयि ॥ २७ ॥

रथारूढं च ये भक्ताः पश्यन्ति श्रद्धया युताः ।
न तेषां जायते जन्म संसारे दुःखसागरे ॥ २८ ॥

ततः श्रावणके मासि नद्यां हिन्दोलयेच्च माम् ।
हरितावनिभागेषु निकुञ्जेसु च कालतः ॥ २९ ॥

हरितत्वं प्रयातेषु स्थापयेत् प्रियया सह ।
नीलापराजितापुष्पैः कदम्बकुसुमैस्तथा ॥ ३० ॥

ग्रथितां कारयेन्मालां तां मह्यं विनिवेदयेत् ।
पवित्रारोपणं कुर्यान्मन्त्रविद्भिर्द्विजैः सहः ॥ ३१ ॥

श्रावणस्य सिते पक्षे एकादश्यां शुभे दिने ।
रामं गुरुं च मृद्वीभिः पवित्राभिः प्रपूजयेत् ॥ ३२ ॥

ब्राह्मणैः कारयेद्देवे रक्षाबन्धनकर्म च ।
जन्माष्टमीव्रतंकुर्यादुत्सवं च विशेषतः ॥ ३३ ॥

कृष्णो ममांशता जाता देवकीवसुदेवयोः ।
रामोऽहं रघुशार्दूलः श्रीमद्दशरथाङ्गजः ॥ ३४ ॥

प्रयातः सुखिताख्यस्य गोपराजस्य गोपतेः ।
रावणस्यैव दुर्बुद्धेर्वञ्चनाय न संशयः ॥ ३५ ॥

अहं पूर्णं परब्रह्म सेवनीयो निरन्तरम् ।
भक्तैर्भवभयंघोरं तत्क्षणान्निस्तितीर्षुभिः ॥ ३६ ॥

अनन्तस्य व्रतं चैव पूजनं च समाचरेत् ।
एतदावश्यकं कार्यमनन्यैरपि मज्जनैः ॥ ३७ ॥

विजयां दशमीं प्राप्य कुर्यादुत्सवमुत्तमम् ।
मत्सम्बन्धाद्विशेषेण मम भक्तैः सुकोविदैः ॥ ३८ ॥

ततो बाहुलके मासि कर्त्तव्यं मम सेवनम् ।
दीपैश्च धूपगन्धाद्यैः सुगन्धाक्तैर्दिवानिशम् ॥ ३९ ॥

पीतवासकपुष्पैश्च दिव्यहारं प्रकल्पयेत् ।
भक्त्या निवेदयेन्मह्यं हेममालार्पणादिकम् ॥ ४० ॥

हरिप्रबोधिनीं यावत्कुर्याद्दीपगणार्पणम् ।
दीपमालाविशेषेण पूरयेन्मम मन्दिरे ॥ ४१ ॥

तुलसीसविधे चैव गवां गोष्ठे द्विजन्मनाम् ।
अन्नकूटोत्सवे चापि पूजयेन्मम गोकुलम् ।
सौगन्धाद्रिं च रत्नाद्रिमन्नकूटैः प्रपूरयेत् ॥ ४२ ॥

मदग्रतो गवां क्रीडा चान्नकूटं मदग्रतः ।
मदग्रतो दीपमाला हन्ति पापं त्रिजन्मजम् ॥ ४३ ॥

पञ्चभीष्मव्रतं कुर्याद्यावत्पूर्णादिनावधि ।
कार्तिकादधिकं पुण्यं मार्गशीर्षे निरूपितम् ॥ ४४ ॥

यत्र मां गोपिकाः प्रापुर्वरत्वेनात्य भीप्सितम् ।
हेमन्ते प्रोज्ज्वलाङ्गारहसन्तीर्मम मन्दिरे ॥ ४५ ॥

स्थापयेद् दिव्यधूपेन धूपिताश्च सुगन्धिताः ।
तूलवस्त्रपरीधानं सेवयेन्मां श्रिया सह ॥ ४६ ॥

एवमात्मानुरागेण सेवते सां सदैव यः ।
स याति मम सायुज्यमात्मारामो न संशयः ॥ ४७ ॥

एवं यः सततं भक्तो देशकालानुसारतः ।
सेवते मां स्वशक्त्या च स मे प्रियतमः सदा ॥ ४८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

श्रीराम उवाच

बाह्ययागेष्वशक्तश्चेदान्तरं यजनं चरेत् ।
सहस्रदलमध्यस्थं दिव्यं ज्योतिः परं पदम् ॥ १ ॥

हृत्पङ्कजे समानीय भावयेत्साधकोत्तमः ।
श्यामं पीताम्बरं देवं पुण्डरीकाक्षमच्युतम् ॥ २ ॥

धनुर्धरं कौस्तुभाढ्यं श्रीवत्साङ्कितवक्षसम् ।
स्मितरञ्जितबिम्बोष्ठं कमलासेवित सदा ॥ ३ ॥

स्वर्णोपवीतसंवीतं स्वर्णरत्नविभूषितम् ।
स्फुरन्मकरिकाकारकुण्डलद्वयभूषितम् ॥ ४ ॥

लम्बालकलताशोभिवदनाम्भोजसुन्दरम् ।
सर्वावयवशोभाढ्यं त्रिवलीराजितोदरम् ॥ ५ ॥

गम्भीरनाभिसंस्थान सूक्ष्ममध्यस्थलं तथा ।
द्विभुजं मां बालकेलिं स्मरेद्दशरथालये ॥ ६ ॥

सुखितस्य गृहे चापि क्रीडन्तं मोदकानने ।
सहजानन्दिनीकान्तं कुञ्जकेलिविशारदम् ॥ ७ ॥

मानसैरूपचारैश्च तोषयेद्भूरिभोगदैः ।
न मानससमा सेवा न मानससमा क्रिया ॥ ८ ॥

न मानससमा भक्तिर्न मानससमा मतिः ।
तस्मान्मानसरूपाभिः संविधाभिः प्रपूजयेत् ॥ ९ ॥

आसनं वसनं चैव पाद्यार्घाचमनादिकम् ।
गन्धादिकं सनैवेद्यं तथैवारातिकादिकम् ॥ १० ॥

बालभोगादिकं चापि मनसैव प्रकल्पयेत् ।
कुर्याच्च मनसा गानं मनसा नृत्यमाचरेत् ॥ ११ ॥

प्रादक्षिणं च मनसा दण्डवत्प्रणतिस्तथा ।
यावन्न जायतेऽभ्यासो मानसे कर्मणि स्फुटम् ॥ १२ ॥

तावद्बाह्यानि कर्माणि कुर्वीत प्रयतो नरः ।
अभ्यस्ते मानसेकर्मण्यलं बाह्येनकर्मणा ॥ १३ ॥

शतवर्षकृतं कर्म भगवत्सेवनादिकम् ।
तत् क्षणे मानसंकर्मं न तुलां याति तस्य तत् ॥ १४ ॥

ब्रह्माण्डगोलकं भित्वा दृढज्ञानासिना नरः ।
एकं प्रपूरयेत् क्षीरैरन्यं भूरिसिताभरैः ॥ १५ ॥

आहवनीयेन सम्पाच्य पायसं दिव्यतण्डुलैः ।
एकीकृत्य सिताभारान् विभवे मह्यमर्पयेत् ॥ १६ ॥

एव मानससेवासु सौकर्यं भूरितापि च ।
तस्मात्को नाम न नरो मानसं कर्त्तुमर्हति ॥ १७ ॥

मानसे सुलभा दिव्या गन्धपुष्पादिसम्पदः ।
मानसे सुलभो देवः सच्चिदानन्दविग्रहः ॥ १८ ॥

तस्मान्मानसकर्मैव कुर्यान्नित्यमतन्द्रितः।
मम सेवां विधायादौ परिवारं ममार्चयेत् ॥ १९ ॥

श्रीमद्दशरथं तातं कौसल्याद्याश्च मातरः।
भ्रातरं लक्ष्मणं शेषं परौ कीरौ च तत्स्त्रियः ॥ २० ॥

जानकीं हनुमन्तं च कपिवर्गं च मे प्रियम्।
प्रत्येकमुपचारौघैर्माङ्गिल्यां सुखितं तथा ॥ २१ ॥

प्रमोदविपिनं दिव्यमर्चेत्परिकरैः सह।
एवं पूजां समाचर्य कृतकृत्यो भवेन्नरः ॥ २२ ॥

ऐहिके चामुष्मिके च कर्त्तव्यं नावशिष्यते।
प्रेम्णायुतोऽखिलं कुर्यात्तदभावे तु मध्यमम् ॥ २३ ॥

ज्ञानाभावे प्रेमसत्त्वे नैव मध्यमता भवेत्।
तस्मात् प्रेम पुरस्कृत्य सर्वसेवादिकं चरेत् ॥ २४ ॥

यथा स्त्रियो विना भूषां भोजनं च घृतं विना।
भाग्यं विना च पुरुषस्तथा प्रेम विना कृतम् ॥ २५ ॥

अयं रसो भक्तिरूपो भावरूपः सनातनः।
तद्वन्तो रसिका ज्ञेया रसभावविदो जनाः ॥ २६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां षोडशोऽध्यायः ॥ १६ ॥

*

सप्तदशोऽध्यायः

श्रीराम उवाच

चैत्रे मासि सिते पक्षे नवम्यां शुभवासरे।
मम जन्मोत्सवं कुर्याद्बहुवित्तव्ययादिभिः ॥ १ ॥

विपुलं मण्डपं कुर्यात् पुष्पमाल्याम्बरादिभिः।
वासितं पटवासाद्यैः कर्पूरघुसृणादिभिः ॥ २ ॥

कुर्यान्नव शुभान् दिव्यघटान् नीरप्रपूरितान्।
ममाभिषेकं कुर्वीत कुम्भैः शङ्खकुशोदकैः ॥ ३ ॥

उद्वर्त्य घुसृणक्षोदैः स्नानं पञ्चामृतैस्ततः।
शुद्धोदकेन संस्नाप्य जातकोत्सवमाचरेत् ॥ ४ ॥

यथैव दुर्लभे पुत्रे वार्धके वयसि स्थिते ।
जाते कुर्यादुत्सवं च तथैवोत्सवमाचरेत् ॥ ५ ॥

मिष्टान्नभोजनान्युच्चैर्दद्यान्मत्प्रीतिहेतवे ।
वैष्णवेभ्यो ब्राह्मणेभ्यो मम भक्तेभ्य एव च ॥ ६ ॥

कुण्डले मुद्रिकावस्त्रे दद्यान्मत्प्रीतिहेतवे ।
महान्तमुत्सवं कुर्वन् मृदङ्गध्वनिपूर्वकम् ॥ ७ ॥

जातस्य मम संवृद्धयै विप्रेभ्यो भूरिदक्षिणाः ।
एवं वैशाखमासेऽपि नवम्यां शुक्लपक्षके ॥ ८ ॥

सहजायाः शुभं कुर्याज्जन्मोत्सवमुदारधीः ।
सुवासिनीभ्यः कन्याभ्यो दद्याद्भूषणमम्बरम् ॥ ९ ॥

अलंकृत्य स्नानलेपसौरभार्पणभूषणैः ।
भोजयेद्भूरि भक्त्यैव सहजाप्रीतिहेतवे ॥ १० ॥

प्रमोदविपिनग्रामे राजिनीनन्दनालये ।
उत्पन्ना सहजालक्ष्मीर्मम रासविनोदिनी ॥ ११ ॥

तस्मिन् दिने व्रतं कुर्यादुत्सवं च विशेषतः ।
माघशुक्ले च पञ्चम्यामवतीर्णा पुनः प्रिया ॥ १२ ॥

जनकस्य गृहे यज्ञवेद्यां मङ्गलशालिनी ।
तत्रापि चोत्सवं कुर्याद्भक्त्या मत्प्रीतिहेतवे ॥ १३ ॥

ततः प्रदोषसमये दोलयेद्दोलया प्रियाम् ।
मत्सार्धं सहजानन्दां गोपितां भुवनत्रये ।
रत्नभूषणवासांसि नर्तकेभ्यः प्रदापयेत् ॥ १४ ॥

एवं यो वार्षिकं दिव्यमुत्सवं कुरुते नरः ।
स याति मत्पदं दिव्यं यत्र याताः शुकादयः ॥ १५ ॥

अवन्ध्यं तद्दिनं कुर्यान्मत्कथाश्रवणादिभिः ।
वैष्णवान् पूजयेद्भक्त्या मम प्राणा हि ते मताः ॥ १६ ॥

ममापराधं जनितं क्षमेऽहं न वैष्णवानामपराधलेशम् ।
विनाचतद्वैष्णवसेवयाहं गृह्णामि सेवां न कदापि लोके ॥ १७ ॥

यत्र मद्वैष्णवा लोकाः कुपिता यान्ति कारणात् ।
तं देशं सहसा त्यक्त्वा व्रजामि खलु दुर्भगम् ॥ १८ ॥

अपि नाम महापापकारी मल्लक्षणाङ्कितः ।
न दूष्यो वैष्णवीलोकैः पक्षपातोममेदृशः ॥ १९ ॥

तवास्मीति वदेद्यो मां सकृदप्यसकृच्च वा ।
कृतान्तेनापि घोरेण स वै नेतुं न शक्यते ॥ २० ॥

तवास्मीत्यक्षरं लोके मामुद्दिश्य समीरितम् ।
मदीय एव स नरो नात्र कार्या विचारणा ॥ २१ ॥

किमर्थं बहुनामानि किमर्थं बहुमन्त्रकान् ।
किमर्थं बहुशास्त्राणि कण्ठशोषकराणि च ॥ २२ ॥

गृणन्ति च किमर्थं वै स्वाध्यायान् भूरिकष्टदान् ।
मामुद्दिश्य तवामीति सकृज्जल्पेद्दिने नरः ॥ २३ ॥

अयमेव महायागो ह्ययमेव महान् जपः ।
अयमेव महान् योगस्तवास्मीति यदुच्चरेत् ॥ २४ ॥

ममैव निहितं तिष्ठेन्नान्यस्य कस्यचिद्भवेत् ।
देवानां वा पितृणां वा मनुष्याणामथापि वा ॥ २५ ॥

असंगः सर्वदातिष्ठेत्तथा वर्णाश्रमादिषु ।
अहमेव तस्य वर्णोऽप्यहमेवाश्रमस्तथा ॥ २६ ॥

अहमेव तथाऽऽधार ऐहिके पारलौकिके ।
मामेव सर्वविश्वासादाश्रयेद्भवसागरे ॥ २७ ॥

तमहं मोचयाम्यद्धामयि भारसमर्पिणम् ।
अहंकारोऽयमेव स्यादैहिकादिभरः स्वतः ॥ २८ ॥

मयि संन्यस्य तं भारं सुखी तिष्ठेत मत्परः ।
सर्व एव भरो विष्णौ (रामे) मयि ब्रह्माण्डरक्षके ।
तमात्मनि शठः पश्यन् बन्धनं याति मानवः ॥ ३९ ॥

एवं भक्तिपथः प्रोक्तो मया तुभ्यं महामुने ।
उत्तमः सर्वधर्माणां शरीराणां यथा शिरः ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

श्रीराम उवाच

अथ योगं प्रवक्ष्यामि शृणु ह्येकमना मुने ।
येन विज्ञातमात्रेण नरैः कैवल्यमश्नुते ॥ १ ॥

कर्मिणां कर्मयोगः स्याज्ज्ञानिनां ज्ञानमेव सः।
भक्तिमान् भक्तियोगेन निरुध्याच्चित्तमात्मनः ॥ २ ॥

मूलाधारस्थितं ज्योतिः कुण्डल्यामाविर्भावयेत्।
प्रणवाख्येन दण्डेन नादरूपेण चालयेत् ॥ ३ ॥

नादोद्भूतः प्राणवायुरपाने बलवत्तरः।
पराधारंनुदेदग्निं तच्छिखा कुण्डली स्पृशेत् ॥ ४ ॥

तया प्रचोदितं तीव्रं कुण्डल्याख्यं परं महः।
व्याप्य सूक्ष्माणि मार्गाणि हृद्देशं गच्छति द्रुतम् ॥ ५ ॥

तत्र जीवात्मना · सार्द्धं विद्युत्तेजःप्रभासुरम् ।
भ्रूपुटे सद्य आगत्य परं चैतन्यमाप्नुयात् ॥ ६ ॥

तदूर्ध्वं रोधिनी भित्त्वा सहस्रदलमश्नुते ।
ब्रह्मानन्दसमुद्रस्य वेला सा रोधिनी भवेत् ॥ ७ ॥

अन्यथा वृद्ध एवासौ सर्वतः प्लावयेज्जगत्।
सर्वेऽपि च विमुक्ताः स्युः पशुपक्ष्यन्त्यजा अपि ॥ ८ ॥

तान् रुणद्धि ततो विद्या त्रिगुणा रोधिनी हि सा।
तदूर्ध ब्रह्मलोकोऽस्ति मत्प्रभात्माक्षरात्मकः ॥ ९ ॥

तं प्राप्य मुक्तिसाम्राज्यं सद्यः प्राप्नोति मानवः।
न तत्र कालकलना न मायाकृतविस्मृतिः ॥ १० ॥

न जरा नापि दुःखाद्यास्त्रिगुणप्रसृतिस्तथा ।
योगी तस्य प्रविश्यान्तस्तुरीयामश्नुते कलाम् ॥ ११ ॥

निमेषोन्मेषरहितां साक्षाद्ब्रह्मस्वरूपिणीम् ।
तस्य हेतुर्बोधमयी दीक्षा सद्गुरुगोपिता ॥ १२ ॥

शक्तिसंचारतो लभ्या सद्य एव प्रजायते।
परमेश्वरसंतोषाच्चिरमेव प्रजायते ॥ १३ ॥

तदर्थं भूरिकर्माणि योगाङ्गानि प्रसाधयेत् ।
पूर्वजन्माभ्यासवशाद् वैराग्ये स्थिरतां गते ॥ १४ ॥

अथ ज्ञानकलोदेति सापि योगो निगद्यते ।
द्विविधोऽपि च योगोऽयं स्वाश्रया मुक्तिरुच्यते ॥ १५ ॥

पराश्रया भवेन्मुक्तिर्भक्तियोगेन चात्रिज ।
परो नाम सदानन्दो राम एवाहमच्युतः ॥ १६ ॥

क्षराक्षरावतिक्रम्य भासमाने निजे पदे ।
तदाश्रया तु या मुक्तिर्दुर्लभा मत्कृपां विना ॥ १७ ॥

ऐक्यसायुज्यभेदेन सा द्विधा परिकीर्तिता ।
पूर्वतोऽप्यधिकानन्दा द्वितीया सातिदुर्लभा ॥ १८ ॥

मल्लोकनित्यलीलाख्यमद्भोगानन्दरूपिणी ।
सांख्येऽप्ययं समुद्दिष्टो योगो मद्योगकारकः ॥ १९ ॥

सर्वेषामपि योगानां भक्तियोगो विशिष्यते ।
अल्पायासो बहुफलो मत्स्वरूपप्रदस्तथा ॥ २० ॥

योगो योग इति ग्रन्थेष्वसंदेहान्निरूपितः ।
केचिदेव मुनिश्रेष्ठास्तं जानन्ति मदात्मकम् ।
नास्माद्व्युत्तिष्ठते योगी मद्भक्तो मयि संगतः ॥ २१ ॥

तस्मादेनं द्विजश्रेष्ठ नित्यमभ्यस्य चेतसा ।
चित्तेऽपि खण्डशो जातमखण्डं कुरु यत्नतः ॥ २२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायामष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

श्रीराम उवाच

सत्त्वं रजस्तमश्चैव त्रिगुणाः परिकीर्तिताः ।
पुरुषः प्रकृतिश्चैव महांश्चाहंकृतिस्तथा ॥ १ ॥

शब्दस्पर्शौ रूपरसौ गन्धो मायाश्च पञ्चकाः ।
खं वायुर्ज्योतिरापो भूः पञ्चभूतानि च क्रमात् ॥ २ ॥

ज्ञानेन्द्रियाणि पञ्चैव श्रोत्रत्वग्घ्राणदृग्रसाः ।
पञ्च कर्मेन्द्रियाण्येव वाग्दोर्मेढ्राङ्घ्रिपायवः ॥ ३ ॥

तथैव सर्वसंयोगिषड्ज्ञानकरणं मनः ।
आध्यात्मिकस्तु यो वर्गः सोऽसावेवाधिदैविकः ॥ ४ ॥

आधिभौतिकवर्गश्चएकत्रैवप्रतिष्ठितः ।
मदंशाधिष्ठिताः सर्वे भासन्तेऽमी प्रदीपवत् ॥ ५ ॥

माया गुणानां सम्भेदादेकैव बहुरूपिणी ।
कालस्तु भगवान् साक्षान्मद्रूपो नित्य एव सः ॥ ६ ॥

सूत्रं चैव महान् प्राणो बुद्धिश्चाहंस्वरूपिणी ।
परमात्मा च सर्वाद्यः प्रकृतिः पुरुषस्तथा ॥ ७ ॥

एक एव द्विधाजातस्तदेवाक्षरमुच्यते ।
मद्रूपं परमानन्दस्तिरोभूयात्र तिष्ठति ॥ ८ ॥

सत्त्वस्य व्यवधानेन मुख्यजीवः स ईरितः ।
सृष्टोच्छावशगोभूतः सोऽहमेव न संशयः ॥ ९ ॥

अयमेव च कूटस्थो ब्रह्माव्यक्तादिशब्दितः ।
अण्डानि कोटिशस्तस्य प्रतितिष्ठन्ति विग्रहे ॥ १० ॥

अक्षरं ब्रह्म तद्धाम ममैव ज्ञानिनां गतिः ।
अहं प्रभुर्भक्तिगम्यो मम लोकोऽयमक्षरः ॥ ११ ॥

पादो मे सर्वभूतानि त्रिपाद् ब्रह्मेदमक्षरम् ।
ब्राह्मणश्च ममांशोऽस्य परस्य पुच्छमुच्यते ॥ १२ ॥

ज्ञानात्तस्योपासनया तन्मयो जायते नरः ।
भक्त्या ममोपासनया मन्मयो भवति ध्रुवम् ॥ १३ ॥

एतदेव ज्ञानमार्गे सेव्यमक्षरमुत्तमम् ।
अहं ततोऽधिको ज्ञेयः पूर्णानन्दैकविग्रहः ॥ १४ ॥

चिदानन्दौ तिरोभाव्य सत्त्वांशव्यक्तिमात्रतः ।
रूपान्तरं चाक्षरस्य कालः सकलसम्भवः ॥ १५ ॥

तत्र नित्या क्रियाशक्तिः प्राधान्येन प्रतिष्ठिता ।
सर्वोत्पत्त्यन्तकरणी चिच्छक्तिर्विकृतौ स्फुटम् ॥ १६ ॥

काले पुनर्यदैश्वर्यं तन्ममैव न संशयः ।
अत एवेश्वरः कालः सर्वस्यान्तर एव च ॥ १७ ॥

आसुरस्तमुपासीत कालरूपं मदात्मकम् ।
तत्रैव लीनतां गच्छेन्महातमसि भीषणे ॥ १८ ॥

ममाधिकारिणां मुख्यः काल एव न संशयः ।
यथाहं साम्यवैषम्यात्तथासौ फलदायकः ॥ १९ ॥

तद्भेदाः सूर्यगतय आधिभौतिकरूपकाः ।
एवमेव भवेत्कर्ममद्रूपं नियतं फले ॥ २० ॥

अग्रपश्चाद्भावभेदाद्द्विधैव प्रकटं च तत् ।
एवं स्वभावोऽपिभवेन्मत्तनुः सर्ववस्तुगः ॥ २१ ॥

आविर्भावतिरोभावैः परिणामस्तु तत्कृतः ।
अक्षरं वासुदेवश्च कालः संकर्षणो हि वै ॥ २२ ॥

कर्म प्रद्युम्न एवास्ति स्वभावश्चानिरुद्धकः ।
एवं चतुर्व्यूहतनुः प्रकटः सर्वो ममांशतः ॥ २३ ॥

अष्टाविशतिरेव स्युस्तत्त्वानि मेकलक्षतः ।
तद्रूपं विधिना ज्ञेयं ममसायुज्यसिद्धये ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायामेकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः

आत्रेय उवाच

कथं तत्त्वात्मकं राम त्वां ध्यायन् मुच्यते नरः ।
एतन्मे रघुशार्दूल कृपया कथय प्रभो ॥ १ ॥

श्रीराम उवाच

पद्भ्यामाजानुपर्यन्त भूतधात्री प्रतिष्ठिता ।
चतुरस्रा पीतवर्णा स्ववीर्यसहितापि च ॥ २ ॥

तत्र चित्तं शनैः स्थित्वा तन्मयं जायते ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तदपां मण्डलमाविशेत् ॥ ३ ॥

जानुभ्यां नाभिपर्यन्तमपां मण्डलमुत्तमम् ।
शुक्लवर्णं स्ववीर्येण युक्तं वरुणदैवतम् ॥ ४ ॥

तत्र चित्त शनैः स्थित्वा तन्मयं जायये ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तत्तेजोमण्डलमाविशेत् ॥ ५ ॥

नाभेर्हृदयपर्यन्तं तेजोमण्डलमुत्तमम् ।
रक्तवर्णं त्रिकोणं च वह्निदैवतवीर्यभाक् ॥ ६ ॥

तत्र चित्तं शनैः स्थित्वा तन्मय जायटे ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तद् वायुमण्डलमाविशेद् ॥ ७ ॥

हृदयात्कण्ठपर्यन्तं वायुमण्डलमुत्तमम् ।
षट्कोणं च हरिद्वर्णं स्ववीर्यसहितं सदा ॥ ८ ॥

तत्र चित्त शनैः स्थित्वा तन्मयं जायते ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तन्नभोमण्डलमाविशेत् ॥ ९ ॥

कण्ठाद्भ्रूमध्यपर्यन्तं नभोमण्डलमुत्तमम् ।
शुद्धस्फटिकसंकाशं वर्तुलं वीर्यसंयुतम् ॥ १० ॥

तत्र चित्तं शनैः स्थित्वा तन्मयं जायते ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तन्मनःस्थानं समाविशेत् ॥ ११ ॥

संकल्पं च विकल्पं च तद्वृत्तिं निरसेद्ध्रुवम् ।
ततो बोद्धव्यरूपं तन्निश्चितं जायते मनः ॥ १२ ॥

बोद्धव्यं बुद्धिविज्ञानं जायते तच्चवै ध्रुवम् ।
विज्ञानं हीनविषयं चैतन्यं जायते ततः ॥ १३ ॥

मनो बुद्धिश्च विज्ञानं चित्तं चाहंकृतिस्तथा ।
भवेत् पञ्चात्मकमिदमन्तःकरणशब्दितम् ॥ १४ ॥

ततो भ्रूदेशतश्चोर्द्ध्वं सहस्रदलतोऽप्यधः ।
अहमस्मीति संवित्या शुद्धात्मानं च लक्षयेत् ॥ १५ ॥

अहंतायां निवृत्तायामस्मीतिद्योतते विभुः ।
अस्मितायां निवृत्तायां स्वरूपमवभासते ॥ १६ ॥

ज्ञातृज्ञेयाख्य सम्बन्धे ततः शान्तिमुपागते ।
गुणातीत पद गत्वा न ततो विनिवर्त्तते ॥ १७ ॥

यतो निवर्त्तते नैव यत्रोच्चैः सुखमश्नुते ।
यत्र चात्येति त्रिपथं गुणातीतपदं हि तत् ॥ १८ ॥

एषा ते तत्त्वसंदोहसंस्था प्रोक्ता मया मुने ।
रहस्यं योगिनामेतज्ज्ञानिनां च विशेषतः ॥ १९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां विंशोऽध्याय. ॥ २० ॥

एकविंशोऽध्यायः

श्रीराम उवाच

अथतेऽहं प्रवक्ष्यामि ज्ञानं सिद्धान्तशब्दितम् ।
मार्गस्त्रेधापिपूर्वोक्तः फलसिद्ध्यै भवेद्ध्रुवम् ॥ १ ॥

कर्मोपास्तिज्ञानरूपस्तेषु भक्तिर्विशिष्यते ।
कर्मज्ञाने पृथक् तेन काण्डद्वये निबोधिते ॥ २ ॥

विशिष्ट रूपो वेदार्थो ह्यहमेव न संशयः।
तत्साधनं भवेत्प्रेम तस्य साधनमीर्यते ॥ ३ ॥

तेषां वक्ता स्वयं देवोऽभ्यासपूर्वं निषेवितः।
भक्तिशास्त्रेषु सर्वेषु तदेव प्रतिपाद्यते ॥ ४ ॥

तेषां वक्ता स्वयमहं मत्कलाश्च विशेषतः।
भगवांश्च हयग्रीवो मत्स्यः श्रीकपिलस्तथा ॥ ५ ॥

वेदव्यासस्तथाऽऽत्रेयो भगवानृषभस्तथा।
नारायणो रमाशेषौ ब्रह्मा चैव सनातनः ॥ ६ ॥

सनत्कुमारो भगवान् नारदश्च सुदर्शनः।
इत्याद्या भक्तिशास्त्रस्य ह्याचार्याश्च प्रवर्त्तकाः ॥ ७ ॥

ममांशा मन्मतविदो भक्तप्रीतिविवर्द्धनाः।
एतेषां मतमाज्ञाय श्रवणादिपरो भवेत् ॥ ८ ॥

मोहशास्त्राणि सर्वाणि तदाचारांश्च वर्जयेत्।
छलयोगस्तथा सांख्यं वामं शाक्तं तथैव च ॥ ९ ॥

सिद्धान्तः कौलमार्गश्च कर्मासक्तश्च वैदिकः।
इत्यादीन् वर्जयेन्मार्गान् लोकव्यामोहकारकान् ॥ १० ॥

मार्गोऽयं सर्वमार्गाणामुत्तमः परिकीर्तितः।
यत्र पातभयं नास्ति प्रायश्चित्तं तथैव च ॥ ११ ॥

मोचकः सर्वथैवाहं सप्रमेयफलात्मकः।
यत्र वर्णाश्रमाचाराः सर्वे नश्यन्ति कालतः ॥ १२ ॥

तत्र धर्मः कथं सिद्धयेत्कथं वा भवमोचनम्।
तस्मात्सर्वेषु धर्मेषु वैदिके तान्त्रिकेऽपि च ॥ १३ ॥

विश्वासं चादरं त्यक्त्वा मम भक्तिं समाश्रयेत्।
भक्तौ वापि विशेषेणमत्प्रपत्तिपरो भवेत् ॥ १४ ॥

नास्मिन् विरुद्धकरणं प्रकृत्या न विरुद्धयते।
अहं प्रमाण चैवात्र भवेन्मार्गः क्व चेदृशः ॥ १५ ॥

परन्तु मत्कृपाहीनः सर्वथा सुतरामपि।
मार्गेऽस्मिन्नन्तरं[१] तस्मान्मत्कृपाहेतुतत्परः ॥ १६ ॥

भवेद् विद्वान् घोररूपं भवं यो निस्तितीर्षति।
मत्सेवातत्पर प्राज्ञ रम्भादिदोषवर्जितम् ॥ १७ ॥

भक्तिशास्त्रैकतत्वज्ञं भजेत्सद्गुरुमादरात्।
तदभावे च मन्मूर्त्तिं कृत्वा भावपरायणः ॥ १८ ॥

---

१ अन्तरम्—विघ्नबाहुल्यम्—टि० बड़ौ०।

नित्यं परिचरेद्भक्त्या मद्रूपाभेदभावनात् ।
साकारं व्यापकं ब्रह्म मन्त्रस्यापि च वैभवम् ।। १९ ।।

तस्मात्प्रपूजयेन्मूर्त्तिमुपचारैर्विधानतः ।
वस्त्रैर्विभूषणैश्चापि कृत्या सुन्दरतां नयेत् ।। २० ।।

अलंकुर्वीत सप्रेम स्थानतश्च स्वरूपतः ।
अनुकूलांश्च भार्यादीन् परिचर्यां प्रकारयेत् ।। २१ ।।

उदासीनेषु वा तेषु स्वयं कार्यं स्वभावतः ।
प्रतिकूलेषु वा तेषु गृहमेव परित्यजेत् ।। २२ ।।

तत्त्यागे दूषणं नास्ति यतोरामपराङ्मुखाः ।
असौकार्यं जीविकाया एकं यामं तथा नयेत् ।। २३ ।।

याममात्रकृता सेवा कुर्याद्दिनभबन्ध्यकम् ।
सहेत परुषं सर्वं सर्वेषां मत्प्रयत्नतः ।। २४ ।।

वैराग्यं परितोषं च सर्वथा न परित्यजेत् ।
एतद्देहावसाने च कृतार्थः स्यान्न संशयः ।। २५ ।।

इति निश्चित्य मनसा स मां परिचरेत्सदा ।
सर्वापेक्षां परित्यज्य कृत्वा चैव मतिं स्थिराम् ।। २६ ।।

दृढविश्वासतो युक्त्या यथा सिध्येत्तथा चरेत् ।
वृथाऽऽलापं वृथा ध्यानं सर्वथैव परित्यजेत् ।। २७ ।।

आत्मनो यत्प्रियं लोके तन्मह्यं विनिवेदयेत् ।
भक्तिश्रद्धोपपन्नं च दृढं निर्वृत्तिकारि च ।। २८ ।।

उदकाहरणं वस्त्रक्षालनं मार्जनं तथा ।
लेपनं परिकर्मेत्यादिभिः सेवककर्मभिः ।। २९ ।।

देह सम्बन्धिभिः स्वेशं नित्यं परिचरेन्नरः ।
प्रातर्मध्याह्नसायाह्नेष्वादरात्परिपूजयेत् ।। ३० ।।

एवं स्वधर्मं कुर्वीत न निवर्त्तेत् स्वधर्मतः ।
इन्द्रियाणि निगृह्णीयात् स्वविरोधि परित्यजेत् ।। ३१ ।।

धर्मार्थकाममोक्षेभ्यो भक्तिं चैव विशेषयेत् ।
एवं स्वधर्मनिष्ठेषु मदावेशो भवेद्द ध्रुवम् ।। ३२ ।।

तथा साधनवर्गेषु भूयो निष्ठाविवर्द्धनम् ।
मयि सर्वात्मके नित्यं स्वस्व दैन्यं विभावयेत् ।। ३३ ।।

विवर्जयेदहंकारं प्रतिष्ठां स्पृहयेन्न च ।
मद्गुणान् मम नामानि रूपकर्माङ्कितानि च ।। ३४ ।।

चरित्राणि च भूरीणि नित्यं संकीर्तयेन्नरः।
जनानां च समक्षं वै शैवशास्त्रपरेःष्वपि ॥ ३५ ॥
निर्भयः स्वेन भावेन गृणन्मामेव मत्परः।
न कस्यापि स्पृहां कुर्यात् सर्वभूमिपतेरपि ॥ ३६ ॥
रामेति जनसर्वस्व मम नाम सदा वदेत्।
स्वीयं करोमि चैकेन द्वितीयेन सदा ऋणी ॥ ३७ ॥

यावन्तो ब्रह्मणोवक्त्रान्निर्गता वेदराशयः।
ते च सर्वेऽप्यधीताः स्युर्नाम्निनारायणात्मके ॥ ३८ ॥
नारायणस्य यावन्ति पुराणेष्वागमेषु च।
दिव्यनाम्नां सहस्राणि कीर्त्तयन् यत्फलं भवेत् ॥ ३९ ॥
ततः कोटिगुणं पुण्यं फलं दिव्यं मदात्मकम्।
लभते सहसा ब्रह्मन् सकृद् रामेति कीर्तनात् ॥ ४० ॥
ममातिवल्लभतमं मम नाम मदात्मकम्।

ततोऽपि वल्लभतमं सहजेति प्रियं वचः ॥ ४१ ॥
सहजानन्दिनी सीता सीता श्रीर्मोदिनो रमा।
स्वयंलक्ष्मीर्जानकीति नामाष्टकमुदीरयेत् ॥ ४२ ॥
मन्नामतोऽप्यतिफलं नरः प्राप्नोति वै मुने।
आविर्भावे चावतारे मयैव सह जन्मतः ॥ ४३ ॥
सहजानन्दिनीत्याख्यां गता सीता प्रिया मम।

सीता नाम्ना ततो व्याप्ता मयि मद्धर्मरूपिणी ॥ ४४ ॥
यथा हलस्यपद्धतिस्ततः सीतेति कीर्तिता।
सीता सुधारसमयीधारारूपरसात्मिका ॥ ४५ ॥
आनन्दयति विश्लेषात् सन्तप्तं भावरूपिणी।

श्रीः समाश्रीयतेसैव श्रुतिभिः स्मृतिभिस्तथा ॥ ४६ ॥
आगमैर्निगमैर्देवैर्मया च ब्रह्मणापि च।
सनातनेन धर्मेण छन्दोभिः प्रणवेन च ॥ ४७ ॥
तेन सा श्रीरिति प्रोक्ता सहजानन्दिनी प्रिया।
आविर्भावे स्फुटं नित्यं तिरोभावेऽपि चास्फुटम् ॥ ४८ ॥

कैशोरादिषु रूपेषु नित्यं मोदयते हिमाम्।
ततः सा मोदिनी शक्तिः सहजैव प्रकीर्तिता ॥ ४९ ॥
आनन्दरूपिणी नित्यं रमते ब्रह्मणि स्थिता।
तथा रमयते तं च सा रमा कीर्त्तिता बुधैः ॥ ५० ॥

लक्ष्योऽहं सर्वशास्त्राणां स्वयं सा लक्ष्मणं मम ।
तेन चोक्ता स्वयं लक्ष्मीर्महालक्ष्मीश्च मे प्रिया ॥ ५१ ॥
जानाति सैव मे रूपमक्षरात्परतः स्थितम् ।
तेन सा जानकी नाम प्रोच्यते ब्रह्मकोविदैः ॥ ५२ ॥
इति नामाष्टकं दिव्यं निरुक्तं तुभ्यमत्रिज ।
य एतद्धारयेद् भक्त्या स मे श्रीरसिको मतः ॥ ५३ ॥
मन्नाम कीर्त्तयेन्नित्यमेतैर्नामभिरङ्कितम् ।
रामेति रामचन्द्रेति माङ्गल्यातनयेति च ॥ ५४ ॥
प्रमोदवनचन्द्रेति रामेति रमणेति च ।
तथा कुञ्जविहारीति रत्नाद्रिरसिकेति च ॥ ५५ ॥
एतान्यपि च नामानि नित्यमष्टौ प्रकीर्तयेत् ।
किं तस्य बहुभिश्चान्यैः साधनैः फलदायकैः ॥ ५६ ॥
एतन्मुख्यतमं लोके साधनं नामकीर्तनम् ।
अवृत्तिदर्परहितो विश्वस्तो भक्तिसंयुतः ॥ ५७ ॥
आलस्यरहितो नित्यं नामकीर्तनमाचरेत् ।
धनुर्बाणाङ्कितो भूत्वा पूजां नित्यं समाचरेत् ॥ ५८ ॥
पद्माक्षतुलसीमालां ऊर्ध्वपुण्ड्रं सदा वहेत् ।
एतद्धि विप्रलिङ्गं यदुपवीतादिधारणम् ॥ ५९ ॥
एतद्वैष्णवलिङ्गं यदूर्ध्वपुण्ड्रादिधारणम् ।
एकादशीव्रतं चैव तथा जन्माष्टमीव्रतम् ॥ ६० ॥
श्रीगुरोरुत्सवं चैव रामस्य नवमीं च मे ।
जयन्तीं नरसिंहस्य तथा श्रीवामनव्रतम् ॥ ६१ ॥
वर्जयेत्पूर्वसंयुक्तं मम संतोषसिद्धये ।
अन्येऽपि चोत्सवा नित्यं कर्त्तव्या मम तुष्टिदाः ।
एवं धर्मैर्गृहस्थानां प्रसीदामि द्रुतं मुने ॥ ६२ ॥
वर्णाश्रमानामन्येषां नैष्ठिकब्रह्मचारिणाम् ।
एष मुख्यतमो धर्मो नित्यं मत्प्रीतिकारकः ॥ ६३ ॥
सिद्धः सर्वेषु वेदेषु तन्त्रेषु च शुभाध्वसु ।
आचार्याणां सद्गुरूणामृषिष्वमृतसूक्तिषु ॥ ६४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायामेकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

श्रीराम उवाच

यतिश्च श्रद्धया युक्त एवमुक्तं समाश्रयेत् ।
धर्माणां परमो धर्मो यस्ते पूर्वं निरूपितः ॥ १ ॥

तस्य तीर्थविशेषेषु भवेत् पर्यटनं वरम् ।
एकस्थानाश्रयादेव विक्षेपो मनसो भवेत् ॥ २ ॥

भजने प्रतिबन्धश्च जनानामाग्रहस्तथा ।
परपीडादिकं चापि तेन पर्यटनं शुभम् ॥ ३ ॥

यथा यज्ञास्तथा तीर्थान्युपक्लृप्तानि विष्णुना ।
तदन्नान्नाधिकं भैक्षं प्रतिगृह्णीत सद्यतिः ॥ ४ ॥

नामानि च चरित्राणि पठेन्नित्यं गतत्रपः ।
एकाकी निःस्पृहः सन्तो मोहाहंकारवर्जितः ॥ ५ ॥

कुर्यात्पर्यटनं नित्यं मत्परो वीतकल्मषः ।
देहपातनपर्यन्तमव्यग्रं पर्यटेत्सदा ॥ ६ ॥

उत्तमोत्तमधर्मोऽसौ पूर्वमुत्तम ईरितः ।
गृहं सर्वात्मना त्याज्यं संसृतिं निस्तितीर्षुभिः ॥ ७ ॥

न शक्यते चेत् संत्यक्तुं तन्मदर्थं निवेदयेत् ।
अहं हि घोरसंसारमोचको गृहमेधिनाम् ॥ ८ ॥

त्यजेत्सर्वात्मना चार्थं स चेत्त्यक्तुं न शक्यते ।
मदर्थं सम्प्रयुञ्जीत सर्वानर्थनिवारणात् ॥ ९ ॥

न्यासिनां कठिनो धर्मः प्रतिकूलस्तथा क्वचित् ।
अतश्च सर्वदा भाव्यं भक्तेन गृहमेधिना ॥ १० ॥

इन्द्रियाणि हरन्त्येनं घनौघमिव वायवः ।
अतश्च सर्वदा भाव्यं वैष्णवैर्गृहमेधिभिः ॥ ११ ॥

पत्नीपुत्रास्तथापत्यं बान्धवाः सुहृदस्तथा ।
यत्र सर्वेऽपि मद्भक्ता ईदृशं दुर्लभं गृहम् ॥ १२ ॥

गृहमेध्याश्रमेतत्र तिष्ठन् मद्भक्तितत्परः ।
कर्माण्यपि प्रकुर्वाणो ह्यञ्जसा तरते नरः ॥ १३ ॥

सात्त्विकादिप्रभेदेन तेषां कर्माणि च त्रिधा ।
सात्त्विकं कर्मकुर्वाणे यथाश्रुतफलोत्सुकः ॥ १४ ॥

साधयेत्स्वर्गलोकं वा विमानस्त्रीसुखात्मकम् ।
पुण्ये क्षीणे पुण्यशेषं समादाय धरातले ॥ १५ ॥

समीचीनेषु लोकेषु जायते स्वेन कर्मणा ।
राजसं कर्मकुर्वाणो मेर्वादिषु सुखं लभेत् ॥ १६ ॥

तामसं कर्म कुर्वाणः पातालेषु सुखी भवेत् ।
राजसं सात्त्विकं कुर्वन् दैत्यस्वर्गानवाप्नुयात् ॥ १७ ॥

राजसं कर्म कुर्वाणश्चन्द्रलोके महीयते ।
पुण्यशेषे ततो वृष्टिद्वारा भूत्वात्र रूपभाक् ॥ १८ ॥

रेतोरूपं समास्थाय रेतोजन्मसु जायते ।
तामसं कर्म कुर्वाणो गन्धर्वेषु प्रजायते ॥ १९ ॥

तामसं सात्त्विकं कुर्वन् गन्धर्वप्रवरोभवेत् ।
क्षीणे पुण्ये पुनर्भूत्वा वृष्टिद्वारा स जन्मभाक् ॥ २० ॥

तामसं कर्म कुर्वाणः सर्पादिषु सुखी भवेत् ।
एवं त्रयी धर्मपराः पुनरावृत्तिमाप्नुयुः ॥ २१ ॥

देवताश्चेदुपासीत आजन्म नियतव्रतः ।
तत्तत्सायुज्यमात्रं तु तस्य स्यात्परमं फलम् ॥ २२ ॥

एव कर्मगतिर्ब्रह्मन् ब्रह्मणोऽपि दुरत्यया ।
दुर्बोधा चैव सर्वेषां फले चाल्पत्वकारिणी ॥ २३ ॥

मदर्पितं पुनः तत् स्यान्मद्भक्त्यङ्गं न संशयः ।
ज्ञानस्य कर्मणश्चापि तथोपास्तेरवद्यताम् ॥ २४ ॥

भक्तिर्हरतिमन्निष्ठा सद्य एव न संशयः ।
तत्तत्सर्वं प्रकुर्वाणोऽप्याश्रयेन्मामनन्यधीः ॥ २५ ॥

केवलं कर्मनिष्ठानां प्रवाहपतनं भवेत् ।
तस्मादुद्धर्तुमात्मानं मत्प्रेमपरमो भवेत् ॥ २६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे-आत्रेयबोधितश्रीरामगीतायां द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

आत्रेय उवाच

त्वमेव परमं ब्रह्म सदसत्परमव्ययम् ।
प्रकृतेः परमो दिव्यः पुरुषश्च ततः परम् ॥ १ ॥

अक्षरं ब्रह्म यत्पूर्णं तत्ते धाम परं पदम् ।
ततोऽपि परमः पूर्णस्त्वमेव पुरुषोत्तमः ॥ २ ॥

त्वत्तः परतरो नान्यः पूर्णानन्दैकविग्रहात् ।
रसात्मकं त्वत्स्वरूपं रस आनन्द ईरितः ॥ ३ ॥

परन्तु मानुषं रूपं राजलीलां च पालयन् ।
न ज्ञायते परं ब्रह्म पुरुषैः प्राकृतैरिह ॥ ४ ॥

केचिद्द्विषन्ति कलयन्ति परं सखाय-
मन्ये यितेति च विदन्ति परे सुतेति ।
कान्तेति केऽपि कलयन्त्यबला जनास्त्वा-
मित्थं भवे रमसि मानुषभावमेत्य ॥ ५ ॥

तस्य ते रूपमानन्दमात्रं सुन्दरविग्रहम् ।
नेति नेति पुराविद्भिर्गदितं ब्रह्मणः परम् ॥ ६ ॥

कथं ज्ञेयं रामचन्द्र दृष्ट्वाद्धानुभवात्मकम् ।
न हि प्राकृतजीवैस्त्वं याथातथ्येन दृष्यसे ॥ ७ ॥

श्रीराम उवाच

अहं महद् ब्रह्मणि वीक्षणात्मकं बीजं निधायाद्यममोघरूपम् ।
गर्भं दधाम्यस्य प्रभवस्ततोऽभूच्चराचरस्याखिलभौतिकस्य ॥ ८ ॥

ममांशशक्त्या पुरुषः परोऽभून्नारायणः शङ्खगदादिपाणिः ।
सहस्रमूर्द्धा पुरुषस्ततोऽभूद्यन्नाभिपद्मे भगवान् विरंचिः ॥ ९ ॥

प्रादुरासीत्ततो मेधा वेदिकी ब्रह्मणो हृदि ।
स जगाद ततो वेदांश्चतुरः प्रणवादिकान् ॥ १० ॥

शब्दब्रह्ममयी सृष्टिः प्रादुरासीत्तदात्मिका ।
नामरूपप्रपञ्चोऽभूत्ततोऽतिविपुलः स्फुटः ॥ ११ ॥

अहं यज्ञः क्रतुरहमहं सूर्याग्निचन्द्रमाः ।
अहं विद्युदहं वर्षमहं वायुर्घनाशनः ॥ १२ ॥

अहं स्वाहा स्वधाकारश्चाहमेव दिवौकसः ।
अहमेव पिणतॄं च गणो धूमाज्यपायिनाम् ॥ १३ ॥

अहं विधिर्नामध्येयान्यहं मन्त्रगणः पृथक् ।
अर्थवादश्चाहमेव प्रयोगोऽहं क्रियात्मकः ॥ १४ ॥

अहं विश्वमहं चैव विश्वेशो विश्वकारकः ।
अहं विश्वस्य संहर्ता कल्पोऽहं प्रतिसर्गकः ॥ १५ ॥

उपादानं निमित्तं वाप्यहमेव सदा मुने ।
अक्षरात्मा ह्युपादानं निमित्तं पुरुषोत्तमः ॥ १६ ॥

अक्षरेण ततां सृष्टिं क्रीडयाम्यहमिच्छया ।
मम देहे ततं विश्वं प्रकृतिः पुरुषस्तथा ॥ १७ ॥

ब्रह्माद्याः पुरुषांशाश्चशब्दोऽर्थश्च विशेषतः ।
आदित्या वसवो रुद्रा विश्वेदेवाश्च देवताः ॥ १८ ॥

एवं मम शरीरान्तः पश्यन्तो दिव्यचक्षुषा ।
भीषणं मां प्रपश्यन्ति कलिकालं परात्परम् ॥ १९ ॥

भीषया चैव वर्तन्ते ममैवाज्ञा वषानुगाः ।
सामन्ता लोकसामन्तास्तथा कल्पायुषः सुराः ॥ २० ॥

केचित्तु कालरूपं मां पश्यन्ति पुरुषं परे ।
अमृतं मृत्युमेवापि बिभ्रच्छक्त्या स्वविग्रहे ॥ २१ ॥

अपरे लीलया पूर्णं रसानन्दैकविग्रहम् ।
पश्यन्ति रसकेलीनामाश्रयं पुरुषोत्तमम् ॥ २२ ॥

एवं यथायथं स्वेच्छावशगो लोकलोचनः ।
मद्भक्तांश्च विशेषेण रमयामि रमामि च ॥ २३ ॥

मय्यात्माशमतां याते प्रपञ्चस्य लयो भवेत् ।
अन्तरङ्गस्य शक्त्यैव तदा ब्रह्मन् रमाम्यहम् ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

आत्रेय उवाच

प्रयच्छमे परं चक्षुस्त्वत्स्वरूपैकदर्शकम् ।
दिव्यं ज्ञानमयं राम कृपया पुरुषोत्तम ॥ १ ॥

प्रपन्नं मां विजानीहि पादयोस्तव राघव।
यथा त्वां परिपश्येयं तथा कुरु रमापते॥ २॥

त्वत्तोऽन्यस्त्वत्स्वरूपस्य ज्ञापको नैव विद्यते।
तेन त्वां शरणं यातो भीतो घोरभवार्णवात्॥ ३॥

अयं हि कालो दुर्वेगो विना त्वच्छरणागतिम्।
प्रणाशयत्यतो मां त्वं त्रायस्व निजकिंकरम्॥ ४॥

पुरा वसिष्ठादिषु संगतेषु ब्रह्मर्षिवर्येषु विरंचिलोके।
अन्योन्यवादे खलु जायमाने रामेति सारं परमश्रौषमुच्चैः॥ ५॥

ततस्त्वमेवासि परावरेश्वरो विभुश्चिदानन्दमयैकविग्रहः।
पश्यामि येन परमं स्वरूपं तदेव मे दिव्यचक्षुः प्रदेहि॥ ६॥

ब्रह्मोवाच

इत्थं विज्ञापितो रामो भुशुण्ड परमर्षिणा।
स्वरूपं दर्शयामास सर्वश्रुतिशिरोगतम्॥ ७॥

श्रीराम उवाच

पश्य मे मुनिशार्दूल स्वरूपं दिव्यचक्षुषा।
मया तुभ्यं प्रपन्नाय दत्तेन ज्ञानरूपिणा॥ ८॥

पुरुषं च परं चैव पुरुषादपि पश्य माम्।
सर्वाश्चर्यमयं ब्रह्मन् प्रपञ्चं यत्र द्रक्ष्यसि॥ ९॥

ततोऽसौ रामचन्द्रस्य शरीरे सर्वमपश्यत्।
भूतधात्रीं साब्धिवर्षद्वीपपर्वतकाननाम्॥ १०॥

वियच्च विस्तृतं लोकैर्ब्रह्मादिसुरसंश्रयैः।
ज्योतिश्चक्रं वसून् वायूनग्नीन् वरुणमेव च॥ ११॥

स्वस्वलोकसमेतांश्च सर्वान् देवगणानपि।
शेषं पातालभागांश्च दैत्यस्वर्गान् पृथग्विधान्॥ १२॥

कालं दश दिशश्चैव प्रकृतिं पुरुष स्तथा।
एवं विधाश्च पुरुषाः शरीरे यस्यकोटिशः॥ १३॥

स तं पुरुषधौरेयं रामदेहे व्यपश्यत्।
सहस्रशिरसं देवं तपन्तं विश्वतोमुखम्॥ १४॥

किरीटिनं कुण्डलरत्नभासा सहस्रसूर्येन्दुगणं जयन्तम्।
पीताम्बरं शङ्खचक्रे गदाब्जे दधानमीशं कमलासखायम्॥ १५॥

सहस्रबाहुं च सहस्रनेत्रं सहस्रपादोदरवक्त्रकर्णम् ।
शब्दार्थसृष्टिप्रभवं पुराणं सहस्रशाखागणवेदगानम् ॥ १६ ॥
संस्तूयमानं मुनिभिः सुरौघैरणीच्यवर्णं घनसंघवर्णम् ।
तथेन्दुवर्णं महसा विभक्तं कूटं परं ब्रह्मविदेकरूपम् ॥ १७ ॥

कूटस्थमुग्रं विपुलं च कालं करालकायं विलसत्कोटिदंष्ट्रम् ।
प्रभूततेजो विशदाकृतिं विभुं विभासितं ज्वालमालापरीतम् ॥ १८ ॥

विरजां च नदीं पूर्णां ब्रह्माण्डगणकोटिभिः ।
अपश्यत्तस्य देवस्य दण्डेन खलु कालितैः ॥ १९ ॥

कालग्रस्तानि तत्रैव भुवनानि चतुर्दश ।
अपश्यच्च ततोऽप्युच्चैरक्षरं परमं पदम् ॥ २० ॥

पूर्णानन्दघनं धाम ज्ञानगम्यं सुयोगिभिः ।
त्रिपाद्ब्रह्मेति निर्दिष्टं सगुणं निर्गुणं तथा ॥ २१ ॥

स्थूलं सूक्ष्मं विभुं परं श्रीराममहसाञ्चितम् ।
अवतारांस्तथा सर्वांश्चतुर्विंशदशादिभिः ॥ २२ ॥

अनेकधा ह्यसंख्यातान् दिव्यलीलाविनोदिनः ।
अक्षरात्परतोऽपश्यदवतारेभ्य एव च ॥ २३ ॥

रामं त्रैलोक्यसुभगं सहजानन्दिनीयुतम् ।
प्रमोदवनमध्यस्थं दिव्यकान्ताकदम्बकैः ॥ २४ ॥

क्रीडन्तं रासलीलाभिर्नटवेश किरीटिनम् ।
बर्हिरत्नावलीभूषामुद्रामणिविभूषितम् ॥ २५ ॥

युगलं कामिनीवृन्दमध्यमण्डलवर्तिनम् ।
नटवेशोचितमहारङ्गकच्छविरोचिभिः ॥ २६ ॥

काञ्चीगुणैर्भासमानं दिव्यवेणुरवामृतम् ।
वर्षन्तं प्रावृषेण्याभं विद्युत्पीताम्बरावृतम् ॥ २७ ॥

पीताम्बरप्रभामध्योच्छनच्छोप्रभया युतम् ।
प्रमोदवनमानन्दस्वरूपं पर्यपश्यत ॥ २८ ॥

रत्नाद्रिं सरयूं चैव रामकुण्डं मनोहरम् ।
सहजायास्तथा कुण्डं तथा रामवनं महत् ॥ २९ ॥

चतुर्विंशवनालीं च रामकुञ्जं तदन्तरे ।
तत्र दिव्यसखीयूथं गायन्तं रामसद्गुणान् ॥ ३० ॥

आभीरराजं सुखित प्रसन्नां माङ्गल्यकां पितरौ गोकुलेन्दोः ।
अनेकगोपेन्द्रसमूहजुष्टं श्रीनन्दनं राजिनी चैव देवीम् ॥ ३१ ॥

सहजां तत्सुतां रामां श्रीभूलीलादिरूपिणीम् ।
समस्तगुणसम्पन्नां राधिकां रासकेलिनीम् ॥ ३२ ॥

लीलापरिकरं सर्वं नित्यरूपे व्यवस्थितम् ।
एकं रामं च वै पूर्णं दृष्ट्वास्तौषीन्महामुनिः ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां चतुर्विंशोऽध्यायः ॥ २४ ॥

✲

पञ्चविंशोऽध्यायः

आत्रेय उवाच

नमो नमस्ते पुरुषात्मने विभो तस्यापि धौरेयमथो नमाम्यहम् ।
तस्याश्रयं चापि भवन्तमीश्वरं स्तवैः सुकल्पैर्वचनैश्च पौरुषैः ॥ १ ॥

धन्योऽस्म्यहं नाथ तवात्यनुग्रहाद्धन्या कृपा ते करुणार्णवस्य ।
यया स्वरूपं तव रामचन्द्र द्रष्टास्म्यहं ब्रह्मशिवादद्यदृश्यम् ॥ २ ॥

अहो विचित्रं भगवंस्तेवदृशं स्वरूपमद्धा परितः प्रकाशते ।
अवाङ्मनोगोचरमिच्छयैव ते प्रमोदलीलाधिप दृश्यतां गतम् ॥ ३ ॥

अमी सहस्रार्कमरीचिभासो वर्षन्ति पीयूषमहो दृशोर्मे ।
न चेदृशी कापि पुरा परा मे दृष्टा प्रभा तेन विचित्रितोऽस्मि ॥ ४ ॥

अमी प्रभो ते बहवोऽवताराः शरीरतो राम समुल्लसन्ति ।
अनन्ततां तेन तवाप्रमेय प्रत्येमि लीलारसरञ्जितस्य ॥ ५ ॥

रामप्रमोदविपिनाय नमो नमस्ते रत्नाद्रये च सरयूपुलिनावनीभ्यः ।
त्वद्रासकेलिसविलाससमस्तगोपी भूषामणिक्वणितकुञ्जदरीगृहाभ्यः ॥ ६ ॥

किं मे तपः किं विज्ञानं का भक्तिः पदयोस्तव ।
केवलं करुणा राम त्वदीया साधनं मम ॥ ७ ॥

किं ते विधेयमथ न ह्यतिरिक्तमीश पूर्णस्य पूर्णशुभदानसदाकरस्य ।
किं तु प्रपत्तिमनयोः पदपद्मयोस्ते भक्त्या प्रणम्य जगदीश सकृत्करोमि॥८॥

कैवल्यदाननिरतस्य तव स्वभावो भक्तिप्रदानविषये विरलोऽस्ति राम ।
ब्रह्मादिकेष्वसुलभा फलवृन्दभूमा सा वै कृपा रघुपतेमयितेऽवतीर्णा ॥ ९ ॥

किं रावणाद्यसुरकोटिजयेन राम त्वद्वीर्यवृद्धिममरा परितो गृणन्ति ।
यस्याक्षरं परमधाम पद चकास्ति यस्यांशभाज इतरे परपूरुषौघा: ।। १० ।।

परात्परस्त्वमसि राम परोपरेशो साकेतराज्यपदभासितपूर्णलील: ।
श्रीलोचनान्तसुखलालितवक्त्रपद्मलोलालकावलिविनिर्जितकोटिकाम: ।।११।।

त्वत्कोमलाङ्घ्रिकमलप्रभवै: परागै: पूर्णैर्विलिप्ततनुरङ्गुलिशोणभाभि: ।
धन्यो जनो रसिकराजशिरोमणि:स यो वै सदैव तव रूपविलोककारी ।।१२।।

यस्येदृशस्य तव राम रसालशीला लीलाललामललना: पशुवृत्तयोऽपि ।
नित्यं जयन्ति सर्वोपरि वर्तमाना नामैव ते भुवनभूषण मङ्गलाढ्यम् ।।१३।।

रूपं पुनर्नयनदुर्लभमप्सराणां धन्या इमे वत जनास्तव भक्तमुख्या: ।
साकेतवासिमनुजाश्च मुहुर्गृणन्ति किं ते स्तुतिर्निगममानसराजहंस ।।१४।।

किं तेऽर्चनं विविधभोगरसोत्सवाढ्य यद्दर्शनेन करुणासुलभेन राम ।
स्वानन्द सिन्धुलहरीषु विशामितावद् राम प्रपन्नजनकामदपारिजात ।।१५।।

लीलारसं तवनिभाल्य विमोहितोऽस्मि नात: परं प्रिय कदापि पुन: सहिष्ये ।
श्रीमत्पदाम्बुजवियोगमसह्यदु:खं या कापि राम तव दिव्यसखी भवेयम् ।।१६।।

इच्छामि ते विरहजं भय मद्य मोक्तुं नो चेदतीव विरहानलतापतप्त: ।
स्थास्यामि किं नु करुणारसवारिराशे............. ....।। १७ ।।

इत्थं स्तुत्वा पुन: स्तुत्वा पादयोश्च पुन: पुन: ।
निपत्य च निपत्यासौ वाष्पधाराभिषेचित: ।। १८ ।।

पुन: पुन: समुत्थाय ववन्दे दैवतोत्तमम् ।
रूपसंहरणार्थाय प्रार्थयामास भीतवत् ।। १९ ।।

आत्रेय उवाच

दृष्टं परं स्वरूपं ते श्रीराम करुणानिधे ।
अत: परं चक्षुषी मे दृष्टुमेतन्न शक्नुत: ।। २० ।।

कोटिसूर्यप्रभाधारचाकचक्यप्रभासुरे ।
चरणाङ्गुष्ठनखरे मीलतोमम चक्षुषी ।। २१ ।।

तस्मादिदं संहर नाथ पूर्ववत्तदेव मे दर्शय राम रूपम् ।
शान्तं स्वसाकेतपुरीगृहस्थं प्रमोदलीलारसरञ्जितं च ।। २२ ।।

श्रीराम उवाच

मा मेरिदं करुणया मम दृष्टवास्त्वं रूपं व्यतीतगुणसंसृतिकालमायम् ।
नात: परं तव मुने भविता प्रवाहो मन्नित्यधामनि पुन: सततं रमेथा: ।।२३।।

ब्रह्मोवाच

इत्युक्त्वा देवदेवेशो रामस्त्रैलोक्यसुन्दरः ।
तथैवासीत् प्रथमवत् स्वर्णसिंहासनस्थितः ।। २४ ।।

य एतां रामचन्द्रेण गीतामात्रयसंनिधौ ।
संहितां पाठते मर्त्यस्तं देव कृपयेत् स्वयम् ।। २५ ।।

दुर्वाससंश्च संवादं रामस्य च प्रभोरिमम् ।
योऽधीयीत द्विजः प्राज्ञः स ज्ञानी भवति ध्रुवम् ।। २६ ।।

भक्तिमान् भक्तिवृद्धिं च लभते नात्र संशयः ।
तथा कर्मफलं दिव्यं सद्यः प्राप्नोति मानुषः ।। २७ ।।

धर्मार्थकाममोक्षार्थी पुरुषार्थास्तथा लभेत् ।
विस्तृतोऽष्टादशाध्यायैः प्रबन्धोऽयं महामखः ।। २८ ।।

नैतत्प्रकाश्यमप्राज्ञे रामभक्तिविवर्जिते ।
शास्त्रं श्रीरामगीताख्यं दिव्यं सर्वोपरि स्थितम् ।। २९ ।।

पठनीयं प्रयत्नेन श्रीरामेभक्तिमिच्छता ।
परब्रह्मणि सर्वेशे सर्वोपास्यशिरोमणौ ।। ३० ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां पञ्चविंशोऽध्यायः ।। २५ ।।

समाप्तेयमष्टादशाध्यायी श्रीरामगीता ।।

✲